विवरण—गुणविधाने विकल्पो भवेत्—प्रकृत ज्योतिष्टोम की तस्य द्वादशसहस्रं दक्षिणा (ताण्ड्य ब्रा० १६।१।११; आप० श्रौत १३।५।१) वचन से द्वादश उत्तर एक सहस्र (१०१२) गौवें दक्षिणा कहीं हैं। यदि अथैष ज्योतिः आदि वाक्य से ज्योतिष्टोम का ही कथन करके १००० सहस्र-दक्षिणारूप गुण का विधान माना जाये, तो पूर्वोक्त १०१२ गौरूप दक्षिणा के साथ १००० दक्षिणा का विकल्प होगा। विकल्प होने पर पक्षान्तर में =१००० दक्षिणा होने पर १०१२ दक्षिणा का बाध होगा।

व्याख्या—और जो कहा कि ज्योतिः शब्द ज्योतिष्टोम की ही प्रतीक का ग्रहण है [वह ठीक नहीं है]। प्रकरण के सामर्थ्य से ही वहां परोक्ष ज्योतिष्टोम शब्द के साथ [सहस्रदक्षिणा की] एकवाक्यता होवे। वह एकवाक्यता ज्योतिः शब्द के साथ जो प्रत्यक्ष एकवाक्यता है, उसे बाधेगी। यह [बाध] न्याय्य नहीं है। वाक्य निश्चय ही प्रकरण से बलवान् है। और यह [ज्योतिः शब्द]

---

१. 'तासामिमाः' इति काशी मुद्रितेऽपपाठः।

२. सर्वत्र 'शालाशब्द' इति पाठ उपलभ्यते, स चाशुद्धः। उभयोः शालामालाशब्दयो लाशब्द-स्यैव सामान्यात्।

ज्योतिष्मत्त्वाद्वा कर्मान्तरे वर्त्स्यति । यश्च त्रिवृदादीनि ज्योतींषि तेषां साकल्यवचनो विश्वज्योतिः सर्वज्योतिरिति चेन्नेति ब्रूमः। न हि त्रिवृदादिषु ज्योतिःशब्दः प्रसिद्धः। एवं ब्रुवन् प्रसिद्धिं बाधेत। यत्तु वाक्यशेषाज्ज्योतिःशब्दस्त्रिवृदादिवचन इति। तस्मिन्नेव वाक्ये स तत्र प्रयुक्तः, इति गम्यते प्रमाणान्तरेण, न शब्देन। यत्र तु तत्प्रमाणान्तरं नास्ति, न तत्र वर्त्तितुमर्हति। यथा सिंहो देवदत्त इति सिंहशब्दो देवदत्तवचनः प्रमाणान्तरेण। न तु सिंहमालभेतेति यत्र[1]। तत्र तु तत् प्रमाणान्तरं नास्ति। तस्मान्न विश्वज्योतिः सर्वज्योतिरिति च ज्योतिष्टोमस्य वदितारौ। न चेज्ज्योतिष्टोम उच्यते, सर्वाणि कर्मान्तराणि ॥२२॥ इति संज्ञाकृतकर्मभेदाऽधिकरणम् ॥८॥

द्योतन अर्थवाला होने से अथवा ज्योतिष्मत्त्व (=प्रकाशकत्व) से कर्मान्तर में वर्तमान होगा। और यदि कहो कि त्रिवृत् आदि जो ज्योतियां हैं उनके साकल्य (=कृत्स्नता) को कहनेवाला विश्वज्योति और सर्वज्योति शब्द हैं, तो नहीं है ऐसा हम कहते हैं। त्रिवृत् आदि में ज्योतिः शब्द प्रसिद्ध नहीं है। ऐसा (=अप्रसिद्ध अर्थ को) कहता हुआ [पुरुष] प्रसिद्धि को बाधेगा। और जो कहा कि वाक्यशेष से ज्योतिःशब्द त्रिवृत् आदि को कहनेवाला है। वह [त्रिवृत् आदि का कहनेवाला ज्योतिःशब्द] उसी वाक्य में वहां (=त्रिवृत् आदि में) प्रयुक्त है, ऐसा प्रमाणान्तर (=अनुपपन्नता आदि) से जाना जाता है, शब्द से नहीं। और जहां वह [अनुपपन्नता आदि] प्रमाणान्तर नहीं है, वहां वह उस [लाक्षणिक] अर्थ में प्रवृत्त नहीं हो सकता है। जैसे सिंहो देवदत्तः में सिंह शब्द देवदत्त को कहनेवाला है, यह प्रमाणान्तर (=देवदत्त में सिंहत्व सम्भव न होने) से जाना जाता है। जहां सिंहमालभेत (=सिंह का आलभन करे) [कहा जाये, वहां तो सिंह शब्द देवदत्त को कहनेवाला] नहीं होता है। क्योंकि वहां वह [असम्भवता आदि] प्रमाणान्तर नहीं है। इसलिये विश्वज्योतिः सर्वज्योतिः ये भी ज्योतिष्टोम को कहनेवाले नहीं हैं। जब [ज्योतिः विश्वज्योतिः सर्वज्योतिः से] ज्योतिष्टोम नहीं कहा जाता है, तो ये सब कर्मान्तर हैं ॥२२॥

विवरण—प्रतीकमुपादीयते—इसका भाव यह है कि अथैष ज्योतिः में प्रयुक्त ज्योति शब्द ज्योतिष्टोम का अवयव नहीं है। जैसे कण्वरथन्तर सामसंज्ञा का अवयव रथन्तर-साम नहीं होता है। और जो कहीं पर ज्योतिष्टोम के लिये वसन्ते वसन्ते ज्योतिषा यजेत् में ज्योतिः शब्द का प्रयोग है, वह प्रमाणान्तर होने से गौण है। अथैष ज्योतिः में ऐसा प्रमाणान्तर न होने से ज्योतिः शब्द ज्योतिष्टोम का वाचक नहीं है। तस्मिन्नेव वाक्ये सः—अर्थात् जो वाक्यशेष में त्रिवृत् आदि स्तोमों में ज्योतिः शब्द का प्रयोग है, वह भी उसी वाक्य में सामानाधिकरण्य से औपचारिक जानना चाहिये ॥२२॥

—:०:—

---

१. 'न तु यत्र सिंहमालभेतेति' इत्यन्वयः।

[देवताभेदकृतकर्मभेदाऽधिकरणम् ॥९॥]

चातुर्मास्येषु वैश्वदेवे समामनन्ति—तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्[1] इति। तत्र सन्दिह्यते—किमामिक्षागुणके कर्मणि वाजिनं गुणविधिः, उत तस्माद् वाजिनगुणककर्मान्तरमिति? किं प्राप्तम्? गुणविधिरिति। कुतः? वाजेनान्नेन आमिक्षया वाजिनो विश्वेदेवाः, ताननूद्य वाजिनम् विधीयते। तेनोभयं वैश्वदेवम् आमिक्षा वाजिनं च। तस्मिन्नेव च कर्मणि वाजिनगुणविधिः। यथा—अग्निहोत्रं जुहोति[2] इत्युक्ते दध्ना जुहोति[3], पयसा जुहोति[4] इति। एवं प्राप्ते ब्रूमः—

गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥२३॥ (उ०)

व्याख्या—चातुर्मास्य यज्ञ के वैश्वदेव पर्व में पढ़ते हैं—तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम् (=गरम दूध में दही डालते हैं, [उससे दूध फटकर जो घनाभाग पृथक् होता है] वह वैश्वदेवी आमिक्षा होती है, और वाजिन् देवों के लिये वाजिन=जलरूप भाग होता है)। इसके विषय में सन्देह होता है—क्या आमिक्षा गुणवाले कर्म में वाजिन-रूप गुण की विधि है, अथवा उससे वाजिनगुणवाला कर्मान्तर है। क्या प्राप्त होता है? गुण की विधि है। किस हेतु से? वाजरूप अन्न (=अदनीय=दांतों से चबाकर खाने योग्य) आमिक्षा से वाजिन् जो विश्वेदेव उनका अनुवाद करके वाजिन का विधान किया जाता है। इसलिये दोनों(= आमिक्षा और वाजिन) विश्वेदेव देवतावाले हैं। इसलिये उसी(=आमिक्षा गुणवाले)कर्म में वाजिन द्रव्यरूप गुण की विधि है। जैसे—अग्निहोत्रं जुहोति विहित कर्म में दध्ना जुहोति, पयसा जुहोति से दधिरूप और दूधरूप गुण का विधान होता है। ऐसा प्राप्त होने पर कहते हैं—

विवरण—वाजिनो विश्वेदेवाः—वाजिभ्यो वाजिनम् में वाजिभ्यः शब्द से वाजम् अन्नम् आमिक्षारूपं द्रव्यमेषां ते विश्वेदेवाः, तेभ्यः (वाज=अन्न आमिक्षारूप द्रव्य जिनका है, अर्थ के अनुसार वाजिन् शब्द से) विश्वेदेवों का ग्रहण जानना चाहिये। इस प्रकार पूर्वोक्त विश्वेदेवों का ही वाजिभ्यः से अनुवाद करके वाजिन द्रव्यरूप गुण की विधि कही है।

गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥२३॥

सूत्रार्थः—(अपूर्वसंयोगे) अपूर्व संयोग में अर्थात् अपूर्व कर्म के विधान होने पर (गुणः) देवतारूप गुण (च) भी भेदक होता है। (वाक्ययोः) दोनों सा वैश्वदेवी आमिक्षा और वाजिभ्यो वाजिनम्: वाक्यों के (समत्वात्) समान होने से, अर्थात् दोनों में=वैश्वदेवी शब्द में तद्धित प्रत्यय से, और वाजिभ्यः में चतुर्थी विभक्ति से समानरूप से देवतारूप गुण का विधान होने से।

---

१. अनुपलब्धमूलम्। २. तै० सं० १।५।९॥
३. द्र०—दध्नेन्द्रियकामस्य। तै० सं० २।१।५॥ ४. अनुपलब्धमूलम्।

गुणश्चाप्रकृतेन देवताभिधानेन सम्बध्यमानः कर्मान्तरं विदध्यात्। समे हि तदैते वाक्ये भवतः। उभे अपि अपूर्वयोर्यागयोर्विधातृणी। कथं पुनरपूर्वदेवताभिधानम्? यदेदानीमेवोक्तम्—विश्वेषां देवानामनुवादो वाजिभ्य इति। तदुच्यते। इह विश्वेषां देवानां देवतात्वं क्वचिच्छ्रुत्या, क्वचिद् वाक्येन। तद्धितनिर्देशे श्रुत्या, चतुर्थीनिर्देशे वाक्येन। यत्र श्रुत्या देवतात्वं, तत्रामिक्षया सहैकवाक्यत्वम्। यत्र चतुर्थी, तत्र वाजिनेन। तत्रैषामेकत्र श्रुत्या देवतात्वम्। वाक्येन द्रव्यविशेषसम्बन्धः। एकत्रोभयमपि वाक्येन। तदिह देवतात्वं प्रति श्रुतिवाक्ययोर्विरोधः। 'विरोधे च श्रुतिर्बलीयसी' इत्यामिक्षावाक्ये देवतात्वं विश्वेषां देवानाम्, न वाजिनवाक्ये इत्यध्यवसीयते। तेनावगम्यते—अप्रकृतेन देवतापदेनास्य सम्बन्ध इति। तस्मात् कर्म्मान्तरमिति ॥२३॥

व्याख्या—अप्राकृत देवता के कथन से सम्बध्यमान गुण भी कर्मान्तर का विधान करेगा। तब ये समान ही वाक्य होते हैं। दोनों ही वाक्य अपूर्व याग के विधाता होते हैं। (आक्षेप) देवता का अपूर्व विधान कैसे है? जब कि अभी कहा था कि—विश्वेदेवों का अनुवाद है वाजिभ्यः में। (समाधान) उसे कहते हैं। यहां [पूर्वपक्ष में] विश्वेदेवों का देवतात्व कहीं श्रुति से, और कहीं वाक्य से होता है। तद्धितनिर्देश [वैश्वदेवी] में [साऽस्य देवता (अष्टा० ४।२।२३) से विहित अण् प्रत्ययरूप] श्रुति से, और [वाजिभ्यो वाजिनम् में] चतुर्थी-निर्देश में वाक्य से होता है। जहां श्रुति से देवतात्व कहा जाता है, वहां आमिक्षा के साथ उस [देवता] की एकवाक्यता होती है। और जहां चतुर्थी-निर्देश है, वहां वाक्य से देवता की वाजिन के साथ एकवाक्यता होती है। वहां (=दोनों में से) एक में [तद्धितप्रत्ययरूप] श्रुति से देवतात्व कहा जाता है। और वाक्य से द्रव्यविशेष [आमिक्षा] के साथ सम्बन्ध होता है। एक में [देवता का कथन, और द्रव्यविशेष वाजिन का सम्बन्ध] दोनों ही वाक्यों से कहे जाते हैं। वह यहां देवतात्व के प्रति श्रुति और वाक्य का विरोध है। 'विरोध में श्रुति बलवती होती है' (द्र०—मी० ३।३।१४) इससे आमिक्षा वाक्य में विश्वेदेवों का देवतात्व है, वाजिनवाक्य में नहीं होता है, यह जाना जाता है। इससे जाना जाता है—इस [वाजिन द्रव्य] का अप्रकृत (=अपूर्व) देवतापद के साथ सम्बन्ध है। इसलिये [वाजिभ्यो वाजिनम् विहित कर्म वैश्वदेवी आमिक्षा विहित कर्म से] भिन्न कर्म है ॥२३॥

विवरण—श्रुत्या देवतात्वम्—साऽस्य देवता (अष्टा० ४।२।२३) से 'विश्वेदेव देवता हैं इसके' इस अर्थ में उत्पन्न अण् प्रत्ययरूप श्रुति से विश्वेदेवों का देवतात्व कहा जाता है। श्रुत्या देवतात्वम्, वाक्येन द्रव्यविशेषसंबन्धः—यद्यपि देवता अर्थ में उत्पन्न प्रत्यय से वह द्रव्य भी कहा जाता है जिस की वह देवता होती है। परन्तु उस द्रव्य का अस्य अस्याः के साथ सामान्य सबन्ध ही गम्यमान होता है, वह अस्य अस्याः वाच्य विशेष आमिक्षा आदि अर्थ गम्यमान नहीं होता है। अतः विशेषार्थ की आकाङ्क्षा की निवृत्ति के लिये समीप उच्चरित आमिक्षा का सम्बन्ध वाक्य से होता है। एकत्रोभयमपि वाक्येन—वाजिभ्यो वाजिनम् में 'वाजिभ्यः' चतुर्थी-निर्देश से इतना जाना जाता है कि वाजिन् के लिये कुछ दिया जाता है। 'वाजिनम्' कर्म से यह किसी का ईप्सिततम है, इतना जाना जाता है। अतः यहां उस वाजिन् का देवतात्व और वाजिन का द्रव्य सम्बन्ध दोनों वाक्य से होतेहैं।

अथ यदुपवर्णितं यथा—'अग्निहोत्रं जुहोति'[1] इत्युक्ते 'दध्ना जुहोति'[2] इत्येवमादयो गुणविधय इति। तत्रोच्यते—

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥२४॥ (उ०)

युक्तं यत् तत्र गुणविधानम्। न तत्राप्रकृतेन केनचिद् गुणेन सम्बन्धः। प्रकृतेन त्वस्ति यागेन। तस्मादनुपवर्णनमेतत् ॥२४॥ इति देवताभेदकृतकर्मभेदाऽधिकरणम् ॥६॥

अथवा यहां इस प्रकार से समझें—पूर्वपक्षी ने वाजिभ्यः में 'वाज' शब्द से मत्वर्थ 'इनि' प्रत्यय द्वारा 'वाज रूप अन्न है जिसका' अर्थ करके वाजिन् का सम्बध विश्वेदेवों के साथ जोड़कर वाजिभ्यो वाजिनम् का अर्थ 'वाजिन् विश्वेदेवों के लिये वाजिन द्रव्य है' अर्थ दर्शाया था। उसमें वाजिभ्यः का विश्वेदेवों के साथ सम्बन्ध विशेषण-विशेष्यरूप वाक्य से ही जाना जायेगा। और वाजिन द्रव्य का वाजिन् देवों के साथ सम्बन्ध भी वाक्य से ही होगा। इस प्रकार आमिक्षा के साथ विश्वदेवों का देवता सम्बन्ध अण् प्रत्ययरूप श्रुति से होता है, और वाजिन का विश्वदेवों के साथ वाक्य से। श्रुति और वाक्य के विरोध में श्रुति बलवती होती है। अतः विश्वदेवों के साथ आमिक्षा का ही सम्बन्ध होगा, वाजिन का नहीं होगा। तस्मात् कर्मान्तरम्—वाजिन का विश्वेदेवों के साथ सम्बन्ध नहीं है, इतना जान लेने पर स्ववाक्योपस्थित चतुर्थी से निर्दिष्ट वाजिनों का ही देवतात्व जाना जायेगा, और वाजिन उसका द्रव्य होगा। द्रव्य और देवता ही याग का स्वरूप होता है। अतः यह कर्मान्तर होगा ॥२३॥

व्याख्या—और जो यह कहा है कि—अग्निहोत्रं जुहोति ऐसा कहने पर दध्ना जुहोति इत्यादि गुणविधियां होती हैं। उस विषय में कहते हैं -

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥२४॥

सूत्रार्थः—(अगुणे) गुणरहित (कर्मशब्दे) कर्मविधायक शब्द अग्निहोत्रं जुहोति में (तु) तो (तत्र) उसके समीप में पठित दध्ना जुहोति आदि वाक्यों में (गुणः) गुण [का विधान] (प्रतीयेत) जाने। अर्थात् जिस कर्मोत्पत्ति वाक्य में किसी द्रव्य वा देवतारूप गुण का विधान न होवे, वहां तत्समीप पठित वाक्य में गुण का विधान जाना जाता है।

व्याख्या—वहां पर (=दध्ना जुहोति आदि में) गुण का विधान युक्त है। वहां (=कर्मोत्पत्तिवाक्य अग्निहोत्रं जुहोति में) किसी अप्रकृत (=अपूर्व) गुण के साथ सम्बन्ध श्रुत नहीं है। वहां तो प्रकृत याग [विधायक वाजिभ्यो वाजिनम् वाक्य] से [देवता-द्रव्यरूप गुण का कथन] वर्त्तमान है। इसलिये [दध्ना जुहोति आदि दृष्टान्त] कथनीय नहीं है ॥२४॥

---

१. तै० सं० १।५।६॥ २. द्र०—दध्नेन्द्रियकामस्य। तै० सं० २।१।५॥

[द्रव्यविशेषानुक्तिकृतकर्मैक्याऽधिकरणम् ॥१०॥

अथवा अधिकरणान्तरम्। दध्ना जुहोति[1] इत्येवमादीनि कर्मान्तराणि विकल्पपरिजिहीर्षयाऽत्रकल्प्यन्ते।

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥२४॥ (आ० नि०)

तदेव तु कर्म जुहोतीति शब्दादवगम्यते। न कर्मान्तरम्। तस्मात् तत्रैव गुणविधिः। वचनाद्विकल्पश्चेति सिद्धम् ॥२४॥ इति द्रव्यविशेषानुक्तिकृतकर्मैक्याऽधिकरणम् ॥१०॥

[दध्यादिद्रव्यसफलत्वाऽधिकरणम् ॥११॥]

अग्निहोत्रं प्रकृत्य समामनन्ति—दध्नेन्द्रियकामस्य जुहुयात्[1] इत्येवमादि। तत्र संशयः—किमग्निहोत्रहोमाद्धोमान्तरं दध्यादिहोमः, उत दध्यादेर्गुणात् फलमिति? किं प्राप्तम्? होमान्तरमिति। कुतः?

व्याख्या—अथवा अधिकरणान्तर है। दध्ना जुहोति इत्यादि विकल्प के परित्याग की इच्छा से कर्मान्तर समर्थित होते हैं।

विवरण—पूर्वपक्षी का कहना है कि यदि दध्ना जुहोति, पयसा जुहोति वाक्यों से अग्निहोत्रं जुहोति वाक्यबोधित कर्म में दधि और पयःरूप गुण का विधान माना जाये, तो 'दही से होम करे' अथवा 'दूध से होम करे' ऐसा विकल्प प्राप्त होता है। उस विकल्प के परित्याग की इच्छा से दध्ना जुहोति, पयसा जुहोति में कर्मान्तर मानना चाहिये।

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥२४॥

सूत्रार्थः—पूर्ववत्।

व्याख्या—[दध्ना जुहोति, पयसा जुहोति में] जुहोति शब्द से वही [अग्निहोत्रं जुहोति विहित] कर्म जाना जाता है। यह [दध्ना जुहोति आदि] कर्मान्तर नहीं हैं। इसलिये वहीं (अग्निहोत्र होम में दध्यादिरूप) गुणविधि है। और [दध्ना जुहोति, पयसा जुहोति] वचनसामर्थ्य से विकल्प होता है, यह सिद्ध होता है ॥२४॥

व्याख्या—अग्निहोत्र को कहकर पढ़ते हैं—दध्नेन्द्रियकामस्य जुहुयात् (दही से इन्द्रिय की कामनावाले के लिये होम करे) इत्यादि। इसमें संशय है—क्या अग्निहोत्रहोम से दध्यादिहोम होमान्तर है, अथवा दधि आदि गुण से [इन्द्रियरूप] फल का कथन है? क्या प्राप्त होता है? होमान्तर है यह। किस हेतु से?

---

१. द्र०—दध्नेन्द्रियकामस्य। तै० ब्रा० २।१।५॥

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् ॥२५॥ (पू०)

फलमिह श्रूयते । तच्च कर्मणो न्याय्यम् । किम् ? दृष्टं हि कर्मणः फलं कृष्यादितो व्रीह्यादि । नेति ब्रूमः । न ह्येतद् दृष्टेनानेन सिद्धयति । यदि दर्शनं हेतुः फलज्ञाने, कृष्यादौ पदार्थे तद्दर्शनं, न होमे । अथ कृषौ दृष्टमन्यत्रापि भवति, द्रव्यादपि प्रसज्ज्यते । अथ कृषिसदृशाद् भवतीत्युच्यते । कृषिसदृशो होमः क्रियात्वाद्, न द्रव्यम् । असदृशं हि तदिति । होमोऽप्यसदृशः । मन्त्रदेवतादिसाधनत्वाद्धोमस्य, लाङ्गलादिसाधनत्वाच्च कृषेः । त्यागात्मकत्वाद्धोमस्य, पाटनात्मकत्वाच्च कृषेः । अथ किञ्चित् सादृश्यं गृह्यते, द्रव्यस्यापि सदनित्यम्[1] इत्येवमादि किञ्चित् सादृश्यमस्ति । अथ द्रव्यादन्यत् सदृशतरमस्तीति कृत्वा न द्रव्यं सदृशमित्युच्यते । होमादप्यन्यत् कृषेः सदृशतरमस्ति दृष्टार्थं-

---

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् ॥२५॥

सूत्रार्थः—(फलश्रुतेः) [दध्नेन्द्रियकामस्य जुहुयात् में इन्द्रियरूप] फल के श्रवण होने से (तु) तो (कर्म) अपूर्व कर्मान्तर (स्यात्) होवे, (फलस्य) फल के (कर्मयोगित्वात्) कर्म का योगी=सम्बन्धी होने से । अर्थात् दधिहोम से इन्द्रियरूप फल के होने से ।

व्याख्या—यहां ['दध्नेन्द्रियकामस्य जुहुयात्' वाक्य में इन्द्रियरूप] फल सुना जाता है । वह कर्म का न्याय्य है । क्या ? कर्म का फल देखा गया है, [जैसे] कृषि आदि से व्रीहि आदि । नहीं है, ऐसा हम कहते हैं । यह [दधिहोम से इन्द्रियरूप फल] इस दृष्ट [कृषिकर्म] से सिद्ध नहीं होता है । यदि फल के ज्ञान में दर्शन (=फलदर्शन) हेतु होवे, तो कृषि आदि पदार्थ के विषय में वह दर्शन है, होम में नहीं है । और यदि यह कहो कि कृषि के विषय में फल का दर्शन अन्यत्र (=होम में) भी होता है, तो ['दध्ना' कहने से] द्रव्य से भी फल प्राप्त होता है । और यदि यह कहो कि कृषिसदृश से होता है । होम कृषिसदृश है क्रियारूप होने से, द्रव्य नहीं है । वह (=द्रव्य) [कृषि के] असदृश है । होम भी सदृश नहीं है । होम के मन्त्र और देवता आदि साधनवाला होने से, और कृषि के हल आदि साधनवाला होने से । त्यागात्मक होम के होने से, और कृषि के पाटनात्मक (=हल से भूमि को खोदनारूपवाला) होने से । और यदि कहो कि कुछ सादृश्य ग्रहण किया जाता है, तो द्रव्य का भी [क्रिया के साथ] सत् (=विद्यमान) होना, अनित्य होना इत्यादि कुछ सादृश्य है [अर्थात् द्रव्य और कर्म दोनों सत् और अनित्य धर्मवाले हैं] । और यदि यह कहते हो कि द्रव्य से अन्य (=कर्म) सदृशतर है, इसलिये द्रव्य सदृश नहीं है । तो होम से भी अन्य कृषि का सदृशतर दृष्टार्थ कर्म है, इसलिये होम भी सदृश नहीं है । [अर्थात् कृषि दृष्ट फलवाला है, इसलिये उसका सदृशतर दृष्टार्थक कर्म ही होगा, होम

---

१. द्र०—सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः ॥ वैशेषिक दर्शन १।१।८॥

मिति कृत्वा होमोऽप्यसदृशः स्यात्। न चैतत्सिद्धम् यत् क्वचिद् दृश्यते, तदन्यस्मिन् सदृशमात्रे अदृष्टमपि भवितुमर्हति इति। यद्धि यस्य कारणभूतं दृष्टं सिद्धे, तच्चेत् साध्येऽपि कारणभूतमित्यवगम्यते, भवति तत्तस्य साधकम्। यन्न ज्ञायते कारणभूतमिति, न तत् सदृशमपि साधकम्। तस्मात् सदृशमपि साधकमसाधकं वेति परीक्षितव्यमिति।

अथ यत् कर्म तत् फलवद् दृष्टम्। होमोऽपि कर्म्म, तेनापि फलवता भवितव्यमिति। उपरते कर्मणि द्रव्याणां तत्संयोगानाञ्च द्रव्यान्तरं फलं दृष्टम्, इति द्रव्यमपि फलवत् स्यात्। अपि च, कृषेर्नादृष्टमिति, तत्सादृश्याद्धोमादपि नादृष्टं भवेत्। कृषिसादृश्याद्वा व्रीहिरेव भवेद्, नेन्द्रियम्। तस्मान्नैवञ्जातीयकेष्वेतद् भवति दृष्टाददृष्टसिद्धिरिति। कथं तर्हि होमान्न्याय्यं फलमिति? उच्यते—शब्देनावगम्यते तत्फलम्। यतः फलमिति शब्द आह, ततो न्याय्यम्। 'होमाच्च फलम्' इति श्रुत्या शब्देन गम्यते, दध्नः फलमिति वाक्येन। श्रुतिश्च वाक्याद् बलीयसी। तस्माद् होमात् फलमिति न्याय्यम्। दध्नः फलमिति चान्याय्यम्।

अपि च, दधि उभयमसमर्थं कर्त्तुं फलं साधयितुं होमञ्च। ननु कम्बलनिर्णेजन-

---

नहीं होगा, क्योंकि होम अदृष्टार्थक है।] और यह सिद्ध नहीं है कि जो कहीं देखा जाता है, वह अन्य तत्सदृशमात्र में अदृष्ट होता हुआ भी हो सकता है। सिद्ध [पदार्थ] में जो जिस का कारणभूत देखा गया है, वह यदि साध्य में भी कारणभूत है, ऐसा जाना जाता है, तो वह उसका साधक होता है। और जो कारणभूत ज्ञात नहीं होता है, वह सदृश [होता हुआ] भी साधक नहीं होता है। इसलिये सदृश भी साधक है अथवा असाधक है, यह परीक्षणीय है।

और यदि कहो कि जो कर्म (=क्रिया) है, वह फलवान् देखा गया है। होम भी कर्म है, उसे भी फलवान् होना चाहिये। कर्म के उपरत (=समाप्त) हो जाने पर द्रव्यों का वा द्रव्यों के संयोगों का द्रव्यान्तर फल देखा गया है, इसलिये द्रव्य भी फलवान् होवे। और भी, कृषि का अदृष्ट फल नहीं है, इसलिये उसके सादृश्य से होम से भी अदृष्ट फल नहीं होना चाहिये। अथवा कृषि के सादृश्य से [होम से भी] व्रीहि ही होवे, इन्द्रिय न होवे। इसलिये इस प्रकार के कर्मों में यह नहीं होता है कि दृष्ट से अदृष्ट की सिद्धि होवे। तो फिर होम से फल न्याय्य कैसे है? कहते हैं—वह [इन्द्रियरूप] फल शब्द से जाना जाता है। यतः शब्द कहता है कि [इन्द्रिय] फल होता है, इसलिये होम से फल न्याय्य है। 'होम से फल होता है' यह श्रुति से[1] जाना जाता है', 'दही से फल होता है' यह वाक्य से जाना जाता है। श्रुति वाक्य से बलवती होती है। इसलिये 'होम से फल होता है' यह न्याय्य है। और 'दही से फल होता है' यह अन्याय्य है।

और भी, दही [इन्द्रियरूप] फल और होम दोनों को सिद्ध करने में असमर्थ है। (आक्षेप)

---

१. 'जुहुयात्' पदोच्चरित विधिलिङ् श्रुति से। जुहुयात् इन्द्रियकामस्य=इन्द्रियकामो होमेनेन्द्रियं फलं भावयेत्, अर्थात् इन्द्रिय की कामनावाला होम से इन्द्रिय को प्राप्त करे।

वदेतद् भविष्यति । निर्णेजनं हि उभयं करोति—कम्बलशुद्धि, पादयोश्च निर्मलताम् । न ब्रूमः एकस्योभयं प्रयोजनमभिनिष्पादयितुं सामर्थ्यं नास्तीति । किं तर्हि ? फले गुणभूतं दधि होमे च, इत्येकं वाक्यं वदितुमसमर्थमिति । यदि फलं दध्ना कुर्यादिति ब्रूयाद्, न दध्ना होममिति । अथ दध्ना होमं साधयेदिति ब्रूयात्, न फलमिति । उभयवचने भिद्येत वाक्यम् । अभिन्नञ्चेदमुपलभ्यते । तस्मान्न गुणात् फलमिति । अग्निहोत्रहोमाद्दधिहोमः कर्मान्तरमिति ॥२५॥

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥२६॥ (उ०)

तुशब्दात् पक्षो विपरिवर्त्तते । न कर्मान्तरम्, किन्तु गुणात् फलमिति । कथम् ? अतुल्ये ह्येते वाक्ये । अग्निहोत्रं जुहुयात् स्वर्गकाम[1] इत्यत्र कर्मसमभिव्याहृतं फलं—स्वर्ग-

---

कम्बल के धोने के समान यह होगा । [कम्बल को पैरों से मथकर धोया जाता है, अतः कम्बल का] धोना दोनों कार्य करता है—कम्बल की शुद्धि और पैरों की निर्मलता । [इसी प्रकार दही फल और होम दोनों का सिद्ध करेगा ।] [समाधान] हम यह नहीं कहते हैं कि एक का दो प्रयोजनों को सम्पादन करने में सामर्थ्य नहीं है । तो क्या कहते हैं ? दही फल में और होम में गुणभूत है, इससे [दध्नेन्द्रियकामस्य जुहुयात्] एक वाक्य दोनों अर्थों को कहने में असमर्थ है । यदि फल को दही से सिद्ध करे [दध्ना इन्द्रियं भावयेत्] ऐसा कहे, तो दही से होम नहीं कहा जायेगा [—दध्ना होमं कुर्यात्] । और यदि दही से होम सिद्ध करे [दध्ना होमं साधयेत्] ऐसा कहे, तो फल को नहीं कहेगा [अर्थात् दध्ना इन्द्रियकामस्य और जुहुयात् के साथ एक साथ संबन्ध नहीं होगा] । दोनों (=दध्ना इन्द्रियं भावयेत्, दध्ना होमं भावयेत्) अर्थों को कहने में वाक्य भेद होगा । यह (=दध्नेन्द्रियकामस्य जुहुयात्) अभिन्न (=एक) वाक्य है । इस लिये [अग्निहोत्र कर्म में दहीरूप] गुण से फल होता है, यह ठीक नहीं है । अग्निहोत्रहोम से दधिहोम पृथक् कर्म है । [पृथक् कर्म होने पर अनेक गुणों का एक साथ कथन स्वीकार किया जाता है । अर्थ होगा—इन्द्रियकामः दधिहोमेन इन्द्रियरूपं फलं भावयेत्] ॥२५॥

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥२६॥

सूत्रार्थः—(तु) 'तु' शब्द पूर्वपक्ष की व्यावृत्ति के लिये है । दधि होम कर्मान्तर है, यह नहीं है । (वाक्ययोः) अग्निहोत्रं जुहुयात् स्वर्गकामः और दध्नेन्द्रियकामस्य जुहुयात् दोनों वाक्यों के (अतुल्यत्वात्) तुल्य=समान न होने से (तस्य) उस=दधि होम का (गुणे) इन्द्रियरूप गुण में फल सम्बन्ध (प्रतीयेत) जाने ।

व्याख्या—'तु' शब्द से पक्ष का विपरिवर्तन होता है । कर्मान्तर नहीं है, किन्तु [दधि] गुण से फल होता है । किस हेतु से? ये दोनों वाक्य असमान हैं । अग्निहोत्रं जुहुयात् स्वर्गकामः इसमें कर्म के साथ [फल का] कथन किया है—स्वर्ग की कामनावाला होम से [स्वर्गरूप] फल

---

१. मैत्रा० आर० ६।३७॥

कामो होमेन कुर्यादिति । दध्नेन्द्रियकामस्य जुहुयात्[1] इति गुणसमभिव्याहृतम् । न ह्यत्र 'होम इन्द्रियाय कर्त्तव्यः' इति प्रतीयते । किं तर्हि? दध्ना होम इन्द्रियकामस्येति । होमस्य दधिसम्बन्ध इन्द्रियाय, न होमस्योत्पत्तिः । य इन्द्रियकामः स्यात, स दध्ना होमं कुर्यामिति । कतमोऽत्र शब्दः पुरुषप्रयत्नस्य वक्तेति ? जुहुयादिति ब्रूमः ।

ननु श्रुत्या होमसम्बद्धमेष पुरुषप्रयत्नं वदति, वाक्येन दधिसम्बन्धम् । न च वाक्यं श्रुतिमपबाधितुमर्हति । न च युगपदुभयसम्बन्धो न विरुद्धचते । वाक्यं हि तथा भिद्येतेति । अत्रोच्यते—ये भवदीयं पक्षमाश्रयेरन्,ते श्रुतिमपबाधेरंस्तराम् । अस्मदीये तु पुनः पक्षे जुहुयादितिधात्वर्थः केवलोऽपबाधितो भवति । युष्मदीये तु कृत्स्न एव दध्नेति शब्दः । तं च 'अप्रमाद्यन्तः समामनन्ति' इति गम्यते । न चैतत्प्रमत्तगीतमित्युक्तम्—तुल्यं हि साम्प्रदायिककम्[2] इति । तस्मान्न कर्मसमभिव्याहृतं फलम् । गुणसमभिव्याहृते तु न कश्चित् प्रमादपाठः । अवश्यं हि जुहुयादिति दधीन्द्रियकामयोः सम्बन्धविधानार्थं वक्तव्यं भवति ।

को सिद्ध करे । दध्नेन्द्रियकामस्य जुहुयात् इस में गुण के साथ [फल का] कथन किया है । यहां 'इन्द्रियरूप फल के लिये होम करे' ऐसा अर्थ प्रतीत नहीं होता है । तो क्या प्रतीत होता है ? दही से होम होता है इन्द्रिय की कामनावाले का । होम का दही के साथ संबन्ध इन्द्रिय के लिये है [इतना मात्र जाना जाता है], होम की उत्पत्ति (='होम करे') नहीं जानी जाती है । जो इन्द्रिय की कामनावाला होवे, वह दही से होम करे । (आक्षेप) यहां कौनसा शब्द पुरुष के प्रयत्न (=कुर्यात्) को कहता है ? (समाधान) 'जुहुयात्' शब्द [पुरुष प्रयत्न को कहता है] ऐसा हम कहते हैं ।

(आक्षेप) यह [जुहुयात में लिङ् लकार] श्रुति से होमसम्बद्ध पुरुष के प्रयत्न को कहता है [—होमेन कुर्यात्], और वाक्य से दही के सम्बन्ध को [—दध्ना फलं भावयेत्] । और वाक्य श्रुति को बाधित करने में समर्थ नहीं है । और दोनों का [=दही और होम का पुरुष-प्रयत्न के साथ] एक साथ सम्बन्ध विरुद्ध नहीं होता है. ऐसी बात नहीं है । क्यों कि वैसा (=दोनों का सम्बन्ध) करने पर वाक्यभेद होता है । (समाधान) इस विषय में कहते हैं—जो आप के [कर्मान्तर] पक्ष का आश्रयण करें, वे श्रुति का अत्यन्त बाध करेंगे । हमारे पक्ष में तो जुहुयात् का धात्वर्थ ही केवल अपबाधित होता है । [लिङ्-प्रत्ययार्थ भावयेत् बाधित नहीं होता है, 'दध्ना इन्द्रियं भावयेत्' अर्थ जाना जाता है ।] आपके पक्ष में तो सम्पूर्ण दध्ना [प्रकृतिप्रत्ययरूप कृत्स्न] शब्द बाधित होता है । [अर्थात् आपके मत में इन्द्रियकामः होमेन इन्द्रियं भावयेत इतना ही अर्थ जाना जाता है, दधि का सम्बन्ध नहीं होता है ।] और 'उस [दध्ना पद] को प्रमाद न करते हुए [वैदिक लोग] पढ़ते हैं' ऐसा जाना जाता है । यह [दध्ना पद] प्रमत्तगीत (=प्रमादी पुरुष से पठित) नहीं है, ऐसा कह चुके हैं—तुल्यं हि साम्प्रदायिकम् (मी० १।२।८) । इसलिये कर्म के साथ कहा हुआ फल नहीं है । [दधि] गुण के साथ कथन होने पर कोई प्रमाद-पाठ नहीं होता है । अवश्य ही दही और इन्द्रियकाम के सम्बन्ध के विधान करने के लिये जुहुयात्

---

१. द्र०—दध्नेन्द्रियकामस्य । तै० ब्रा० २।१।५।। २. मी० १।२।८।।

ननूच्यमानेऽपि न केवलः करोत्यर्थोऽवगम्यते । केवलेन[1] च नः प्रयोजनम्, स च होमसम्बद्धः । तस्मादसमञ्जसमिति । नेति ब्रूमः । होमसम्बद्धोऽप्यसौ करोत्यर्थ एव, केवलं त्वस्य होमसम्बन्धे विशेषः । न तु करोत्यर्थतां बाधते । इन्द्रियकामस्य होमसम्बद्धं प्रयत्नं दधिसम्बद्धं कुर्यादिति ।

नन्वेवं सति स एव दोषः—होमसमभिव्याहृतं फलमिति । उच्यते, जुहुयादिति-शब्दस्यैतत्सामर्थ्यं यद्धोमविशिष्टं प्रयत्नमाह । न त्वत्र होमः साधनत्वेन विधीयते । साध्यत्वेन विशिष्टस्तु प्रयत्नो वाक्येन दध्याश्रितोऽवगम्यते । अत एव च वृत्तिकारेणोक्तम्—'होममाश्रितो गुणः फलं साधयिष्यति' इति । यथा राजपुरुषो राजानमाश्रितो राजकर्म करोतीति । तस्माद्दध्नः फलम्—य इन्द्रियकामः स दध्ना कुर्यादिन्द्रियमिति । कथमिति ? अनयाऽग्निहोत्रेतिकर्त्तव्यतयेति । कुत एतत् ? फलसाधनस्य दध्नः इतिकर्त्तव्यताऽऽकाङ्क्षत्वात् । अस्याश्च इतिकर्त्तव्यतायाः सन्निधानाच्चोदनालिङ्गस्य च जुहोत्यर्थस्य दर्शनात् । यस्मादेव चाऽयं जुहोत्यर्थोऽनुवादः, तस्मादविधायकः । न चान्यद्धोमस्य विधा-

---

पद कथनीय होता है । (आक्षेप) [जुहुयात् पद के] कथित होने पर भी [उससे] केवल 'करोति' का अर्थ (=भावयेत्=सिद्ध करे) नहीं जाना जाता है । हमारा केवल [करोति-अर्थ] से प्रयोजन है, और वह होम से सम्बद्ध है । इसलिये यह [कथन] ठीक नहीं है । (समाधान) नहीं, ऐसा हम कहते हैं । होम से सम्बद्ध भी वह 'करोति' का अर्थ ही [जाता जाता है], केवल इसका होम से सम्बन्ध विशेष है । वह 'करोति' के अर्थ को नहीं बाधता है । इन्द्रिय की कामनावाले के होमसंबद्ध प्रयत्न को दधि से सम्बद्ध करे [यह अर्थ जाना जाता है] ।

(आक्षेप) ऐसा मानने पर वही दोष होगा कि—होम के साथ कहा हुआ (=होमसाध्य) फल है । (समाधान) 'जुहुयात्' शब्द का यह सामर्थ्य है कि वह होमसंबद्ध प्रयत्न को कहता है । यहां होम का साधनरूप (='होमेन फलं साधयेत्' रूप) से विधान नहीं किया जाता है । साध्यरूप से विशिष्ट प्रयत्न वाक्य के द्वारा दधि के आश्रित जाना जाता है [अर्थात् 'फलं भावयेत्' रूप विशिष्ट प्रयत्न दधि के आश्रित है, ऐसा विदित होता है ।] इसीलिये वृत्तिकार [उपवर्ष] ने कहा है—'होमाश्रित गुण फल को सिद्ध करेगा ।' जैसे राजपुरुष राजा के आश्रित हुआ राजा के कर्म करता है । इसलिये दही से फल होता है—जो इन्द्रिय की कामनावाला है, वह दही से इन्द्रियफलरूप को सिद्ध करे । कैसे करे ? जो यह अग्निहोत्र की इतिकर्तव्यता (=अग्निहोत्र में यह करना है, ऐसा जो कथन है उस) से । यह कैसे ? फल के साधनरूप दही की इतिकर्तव्यता की आकांक्षा है [अर्थात् दही से फल कैसे सिद्ध किया जाये, इसकी अपेक्षा होती है] । इस [आकाङ्क्ष्यमाण] इतिकर्तव्यता के समीप में होने से चोदनालिङ्ग [अग्निहोत्रं जुहुयात् में] जुहोति=होम रूप अर्थ के दर्शन से [निराकाङ्क्षता होती है] । जिस कारण यह (=दध्नेन्द्रियकामस्य जुहुयात् वाक्यस्थ) जुहोति का अर्थ अनुवादरूप है, इसलिये यह (=जुहुयात्) पद विधायक

---

१. 'केवले न वचः प्रयोजनम्' इति सार्वत्रिकोऽपपाठः ।

यकं नास्तीति। तस्मान्न कर्मान्तरम्। तस्माद्दध्नः फलमिति। अथवा दधिशब्दस्य विवक्षितार्थत्वाद्दधिहोमसम्बन्धोऽयं वाक्येन विधीयते। तेन दध्नो होमेन सम्बध्यमानात् फलं भविष्यतीति ॥२६॥ इति दध्यादिद्रव्यसफलत्वाऽधिकरणम् ॥११॥

[वारवन्तीयादीनां कर्मान्तराऽधिकरणम् ॥१२॥]

त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशम् अग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत इति। एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत[1] इति। अत्रायमर्थः सांशयिकः—

नहीं हैं। और अन्य (='जुहुयात्' से भिन्न) कोई पद होम का विधायक नहीं हैं। इसलिये यह (दध्नेन्द्रियकामस्य जुहुयात् वचनबोधित कर्म) [अग्निहोत्र से] कर्मान्तर नहीं है। इसलिये दही से ही फल होता है। [अर्थात् अग्निहोत्रं जुहुयात् स्वर्गकामः से विहित जो होम है, उसी में दधि गुण के सन्निवेश से इन्द्रियरूप फल प्राप्त होता है।] अथवा दधि शब्द के विवक्षित अर्थवाला (= प्रमादपाठ न) होने से दधि और होम का सम्बन्ध वाक्य से कहा जाता है। इस कारण 'दही के होम के साथ सम्बद्ध होने से फल होगा' यह जाना जाता है ॥२६॥

व्याख्या—त्रिवृदग्निष्टुद् अग्निष्टोमः, तस्य वायव्यास्वेकविंशम् अग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत (= त्रिवृत् स्तोमवाला अग्निष्टोम=अग्निष्टोम सामवाला अग्निष्टुत् नाम का कर्म है। उसकी वायुदेवतावाली ऋचाओं में एकविंश अग्निष्टोम साम करके ब्रह्मवर्चस की कामनावाला यजन करे)। एतस्यैव रेवतीषु वारवन्तीयम् अग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत (=इस [अग्निष्टोम] की ही रेवतीसंज्ञक ऋचाओं में वारवन्तीय अग्निष्टोम साम करके पशुकामनावाला इससे यजन करे)। यहां यह अर्थ संशयवाला है—

विवरण—हम पूर्व (भाग १, पृष्ठ ३४१-३४३) में लिख चुके हैं कि साम की उत्पत्ति वा दर्शन सामवेद के पूर्वार्चिक में पढ़े मन्त्रों में होता है। अतः ये योनि-ऋक् कहाती हैं। एकं साम तृचे क्रियते स्तोत्रियम् नियम के अनुसार एक साम का तीन ऋचाओं पर गान होता है। जिन तीन

---

१. द्र०—त्रिवृदग्निष्टुद् अग्निष्टोमः, तस्य वायव्यास्वग्निष्टोम साम। ब्रह्मवर्चसकामो यजेत। ताण्ड्य ब्रा० १७।६।१-२॥

२. द्र०—एतस्यैव रेवतीषु वारवन्तीयम् अग्निष्टोमसाम कृत्वा पशुकामो यजेत। ताण्ड्य ब्रा० १७।७।१॥

ऋचाओं पर गान होता है, उनका पाठ उत्तरार्चिक में किया है। इनमें प्रथम ऋचा वही होती है, जो पूर्वार्चिक में योनि ऋक् के रूप में पढ़ी गई है। कहीं-कहीं पर उत्तरार्चिक में तीन ऋचाओं के स्थान में दो ऋचाएं, और तीन से अधिक ऋचाएं भी पठित हैं। वहां दो को तीन अथवा अधिकों को तीन ऋचा कैसे बनाया है, इसका व्याख्यान हम आगे नवम अध्याय में करेंगे। पूर्व पृष्ठ ३४२-३४३ पर कतिपय स्तोमों के नाद और उनकी विष्टुतियों का वर्णन कर चुके हैं।

सोमयाग की सात संस्थाएं हैं। उनके नाम हैं—अग्निष्टोम, उक्थ्य, षोडशी, अतिरात्र, अत्यग्निष्टोम, वाजपेय और आप्तोर्याम। अग्निष्टोमसंज्ञक सोमयाग की समाप्ति अग्निष्टोम स्तोत्र (साम) से होती है। इसी प्रकार उक्थ्य आदि नाम भी उन-उन नामवाले स्तोत्रों से सोमयाग की समाप्ति होने से उक्थ्यादि संज्ञाएं होती हैं।

अग्निष्टोम का अर्थ है—अग्निः स्तूयतेऽनेन=जिससे अग्नि की स्तुति की जाये, वह स्तोत्र =साम अग्निष्टोम कहाता है। परन्तु यह शाब्दिक अर्थ है। इसका पारिभाषिक अर्थ है—यज्ञाय-ज्ञीयमग्निष्टोम साम (निदानसूत्र ३।१०; पृष्ठ ५७, पं. १३)। इस का शब्दार्थ है—यज्ञायज्ञीय साम अग्निष्टोम कहाता है। यज्ञायज्ञीय शब्द का अर्थ है—यज्ञायज्ञशब्द है जिस साम में। इस अर्थ में यज्ञायज्ञ शब्द से मतौ छः सूक्तसाम्नोः (अष्टा० ५।२।५९) से छ (=प्रत्यय) होकर यज्ञायज्ञीय शब्द बनता है। सामवेद पूर्वार्चिक प्र०१, अर्ध प्र० १, दशती ४, मन्त्र १ इस प्रकार है—यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे(मं० सं० ३५)। इस ऋचा में उत्पन्न वा दृष्ट साम में 'यज्ञायज्ञा' शब्द होने से यज्ञायज्ञीय कहाता है। इस मन्त्र में दृष्ट चार साम ग्रामे गेय (वेय गान) ग्रन्थ में संग्रहीत हैं। उनमें प्रथम दो उपहव, तीसरा औष्टीगव, और चौथा यज्ञायज्ञीय कहाता है। (द्र०—ग्रामे गेय-आरण्यगेय साम, स्वाध्याय-मण्डल, पारडी, पृष्ठ ९)। सामगानों की तुलना वर्तमान संगीत के पक्के रागों से की जा सकती है।

अग्निष्टोम-संस्थाक छः अग्निष्टुत् याग ताण्ड्य ब्रा० अ० १७, खण्ड ५-६ में विहित हैं। इनमें आद्य दो (खण्ड ५) त्रिवृत् अग्निष्टोम हैं। प्रकृत शाबर भाष्य में उद्धृत प्रथम वचन तृतीय अग्निष्टुत् का विधायक है (द्र०—ताण्ड्य ब्रा० १७।६)। प्रथम दो में अग्निष्टोम स्तोत्र त्रिवृत् होता है (द्र०—त्रिवृत् का स्वरूप भाग १, पृष्ठ ३४२)। तृतीय अग्निष्टुत् में अग्निष्टोम साम का गान यज्ञायज्ञा वो अग्नय आदि मन्त्रद्वय (द्र०—साम सं० उत्तरार्चिक प्र० १, अर्ध प्र० १, त्रिक २०); मन्त्र सं० ५३ ५४; ऊह गान, काशी हि० वि० संस्करण, पृष्ठ १६) के स्थान पर वायव्यासु= वायु देवतावाली उप त्वा जामयो गिरा० यस्य त्रिधात्ववृतं ०पदं देवस्य मीढुषो० (उत्तरार्चिक प्र०७, अर्ध प्र०२, त्रिक १४) ऋचाओं में त्रिवृत् स्तोम के स्थान में इक्कीस स्तोमवाला अग्निष्टोम =यज्ञायज्ञीय साम का गान करना होता है। यहां यह ध्यान में रखना चाहिये कि भाष्यकार ने जो वचन उद्धृत किया है, उसमें एकविंशं पद पठित है। उस से एकविंश स्तोम विवक्षित है। इसी वचन से मिलता हुआ ताण्ड्य ब्राह्मण (१७।६।१-२) का वचन हमने टिप्पणी (पृष्ठ ५०६ टि० १) में उद्धृत किया है, उसमें एकविंशं पद नहीं है। इतना ही नहीं, अग्नेस्तेजो वै त्रिवृत् ब्रह्मवर्चसम् वाक्य से जाना जाता है कि ताण्ड्य ब्राह्मण के अनुसार त्रिवृत् स्तोम ही होता है।

किं तस्यैवाग्निष्टुतोऽग्निष्टोमस्य गुणाद् वारवन्तीयात् पशवः फलम्, एतेन यजेत इत्यनुवादः ? अथ किम् एतेन यजेत इति कर्मान्तरमिति ? किं प्राप्तम् ? न कर्मान्तरम्, गुणात् फलमिति । कुतः ? एतेन यजेत इति विदितस्यैतद्वचनम्, नाऽविदितस्य । अतो न विध्यन्तरम् । 'पशुकाम एवं यजेत' इत्युच्यते, न यजेत इति । कथम् कृत्वा ? वारवन्तीयं कृत्वेति । अपि च 'एतस्यैव' इति विस्पष्टम् अकर्मान्तरवचनम् । तस्माद् 'गुणात् फलम्' इत्येवं प्राप्तम् । एवं प्राप्ते ब्रूमः—

समेषु कर्मयुक्तं स्यात् ॥२७॥ (उ०)

एतस्यैव रेवतीषु—यह चौथे अग्निष्टुत् अग्निष्टोम याग का विधायक वचन है(द्र०—ताण्ड्य ब्रा० १७।७)इसमें रेवतीषु = रेवतीर्नः साधत्वावान्०आ यद् दुवः० ऋचाओं (साम उत्तरा० प्र० ४, अर्ध प्र० १, त्रिक १४) वारवन्तीय साम को अग्निष्टोम साम बनाकर यजन करे । रेवतीषु में 'रेवती' शब्द रेवतीर्नः ऋचा का प्रतीक है । उससे बहुवचन का निर्देश आदि अर्थ के बोधन के लिये है—रेवती प्रतीक आदिवाली ऋचाएं । पाणिनीय सप्तमी शौण्डैः (अष्टा० २।१।३९) में शौण्डैः में बहुवचन शौण्डादि शब्दों (=शौण्डादिगणपठित शब्दों) के ग्रहण के लिये है । वारवन्तीयं साम—'वारवन्त शब्द है जिस साम में' इस अर्थ में पूर्वनिर्दिष्ट मतौ सूक्तसाम्नोः (अष्टा०५।२।५९) सूत्र से छ(=ईय) प्रत्यय होता है । वारवन्त शब्दवाली ऋचा है—अश्वं न त्वा वारवन्तम् (साम पूर्वार्चिक प्र०१, अर्ध प्र० १, दशति २, मन्त्र १७) । इस योनिभूत ऋचा में उत्पन्न साम वारवन्तीय कहाता है । वारवन्तीय साम के तीन भेद हैं (द्र०—ग्रामे गेय गान, पारड़ी संस्क०, पृष्ठ ५) । उत्तरार्चिक प्र० ८, अर्ध प्र० १, त्रिक ७ में गेय वारवन्तीय साम पूर्व संकेतित त्रिविध वारवन्तीय सामों में से तीसरे प्रकार का मिलता है(द्र०—ऊहगान, काशी. हि० वि० वि० संस्क० पृष्ठ ३८४) । इस वारवन्तीय साम को उत्तरार्चिक (प्र० ४, अर्ध प्र०१, त्रिक, १४) पूर्वोक्त रेवती ऋचाओं पर ही गाया है (द्र०—ऊहगान, काशी हि० वि० वि० संस्क०, पृष्ठ १२२-१२४) ।

व्याख्या—क्या उसी अग्निष्टोम संस्थान्त अग्निष्टुत् का वारवन्तीय सामरूप गुण से पशुरूप फल होता है, और एतेन यजेत (=इससे यजन करे) यह [अग्निष्टुत् अग्निष्टोम का] अनुवाद है? अथवा क्या एतेन यजेत से कर्मान्तर का निर्देश है ? क्या प्राप्त होता है ? कर्मान्तर नहीं है, [वारवन्तीय सामरूप]गुण से[पशु]फल होता है । कैसे? एतेन यजेत यह विदित का ही कथन है, अविदित का नहीं [क्योंकि एतेन सर्वनाम पूर्वविहित कर्म का ही परामर्शक है] । इसलिये [एतेन यजेत यह] विध्यन्तर नहीं है । [उक्त वचन में] 'पशु की कामनावाला इस प्रकार यजन करे' ऐसा कहता है, 'यजन करे' ऐसा नहीं कहता है । कैसे करके [यजन करे] ? वारवन्तीय साम करके । और भी,[वाक्य के आरम्भ में]एतस्यैव यह विस्पष्ट अकर्मान्तर को कहनेवाला वचन है । इसलिये 'गुण से फल होता है' ऐसा प्राप्त होता है । ऐसा प्राप्त होने पर हम कहते हैं—

समेषु कर्मयुक्तं स्यात् ॥२७॥

सूत्रार्थ—(समेषु) इस प्रकार के समान (=भिन्न) वाक्यों में (कर्मयुक्तम्) कर्म से युक्त फल (स्यात्) होवे, अर्थात् कर्मान्तर होवे ।

समेष्वेवञ्जातीयकेषु भिन्नवाक्येषु कर्मयुक्तं फलं भवेत्—एतस्यैव रेवतीषु वारवन्तीयं कृत्वा इति। न ह्येतस्य रेवत्यः सन्ति, यास्वस्य वारवन्तीयं भवेत्। तत्र रेवत्यो भवन्ति, तासु च वारवन्तीयं विधीयेतेति वाक्यं भिद्येत। अथोच्येत—'अस्यापूर्वा[1] रेवतीरुपादाय तासु च वारवन्तीयं कृत्वा एतेन यजेतेत्यनुवदति इति। तथाऽग्निष्टोमसामेति नावकल्प्येत। अथाग्निष्टोमसामकार्ये भवतीत्युच्यते[2]। 'एतस्यैव' इत्येतदविवक्षितं स्यात्। उभयस्मिन् विवक्ष्यमाणे भिद्येत वाक्यम्। तस्मात् कर्मान्तरम्।

व्याख्या—इस प्रकार के समान स्वरूपवाले भिन्न वाक्यों में कर्म से युक्त फल होवे [अर्थात् कर्मान्तर से पशु फल होवे]—एतस्यैव रेवतीषु वारवन्तीयं कृत्वा में। इस (=पूर्व अग्निष्टुत् अग्निष्टोम कर्म) की रेवती ऋचाएं नहीं हैं, जिनमें वारवन्तीय साम [का गान] होवे। उस अवस्था में रेवती ऋचाएं होती हैं, और उनमें वारवन्तीय साम का विधान किया जाये, तो वाक्यभेद होगा [—अग्निष्टुतोऽग्निष्टोमस्य रेवत्यो भवन्ति' एक वाक्य होगा, और 'तासु =रेवतीषु वारवन्तीयं साम गायेत्' दूसरा वाक्य बनेगा]। और यदि कहो कि—'इसकी अपूर्व रेवती ऋचाओं को ग्रहण करके और उनमें वारवन्तीय साम [का गान] करके एतेन यजेत (=इससे यजन करे) ऐसा अनुकथन करता है। तो [ऐसा अभिप्राय ग्रहण करने पर] अग्निष्टोम साम नहीं बनेगा [अर्थात् अग्निष्टोम साम उपपन्न नहीं होगा]। और यदि कहो कि—अग्निष्टोम साम के कार्य में [रेवती ऋचाओं में वारवन्तीय साम] होता है। इस अवस्था में एतस्यैव अंश अविवक्षित हो जायेगा। दोनों (=एतस्य=अग्निष्टुत् अग्निष्टोम करे, और अग्निष्टोम साम के कार्य में वारवन्तीय साम का विधान) की विवक्षा करने पर वाक्यभेद होगा। इसलिये कर्मान्तर है।

विवरण—कर्मयुक्तं फलं भवेत्—एतस्यैव ; कृत्वेति नह्येतस्य रेवत्यः सन्ति इस भाष्यपाठ में एतस्यैव···कृत्वेति अंश को पूर्वान्वयी मानकर हमने व्याख्यान किया है। अतः नह्यस्य रेवत्यः सन्ति का सम्बन्ध जोड़ने के लिये अध्याहार करना होगा—'आनन्तर्य से एतस्यैव से अग्निष्टुत् अग्निष्टोम का सम्बन्ध प्रतीत होता है। तथापि ऐसा अर्थग्रहण करने पर, इस अग्निष्टुत् अग्निष्टोम की रेवती ऋचाएं ही नहीं हैं। इस प्रकार वाक्यार्थ जानना चाहिये' (द्र०—तन्त्रवार्तिक)। बृहती व्याख्या के अनुसार एतस्यैव···कृत्वेति को उत्तरान्वयी नह्यस्य रेवत्यः के साथ संबद्ध प्रतीत होता है। इस अन्वय में अर्थ होगा—एतस्यैव से अग्निष्टुत् अग्निष्टोम याग का निर्देश होने पर यह दोष उपस्थित होगा कि इस याग की रेवती ऋचाएं ही नहीं हैं। बृहती के अनुसार व्याख्या करने पर समेष्वेवञ्जातीयकेषु वाक्य से किस वाक्य में कर्मयुक्त फल का विधान किया जा रहा है, उसका निर्देश न होने से अर्थ स्पष्ट नहीं होता है। उस अवस्था में समेष्वेवञ्जातीयकेषु वाक्य का तात्पर्य

---

१. 'अस्य पूर्वा०' इति काशीपूना-संस्करणयोरपपाठः। बृहतीसंवलिते मद्राससंस्करणे शुद्ध पाठ उपलभ्यते।

२. 'भवतीत्युच्येत' इति युक्ततरः पाठः स्यात्।

अथ कर्मान्तरे कथमवाक्यभेदः? 'रेवतीषु ऋक्षु वारवन्तीयं साम कृत्वा पशुकामो यजेत' इत्यपूर्वो यागः सर्वैर्विशेषणैर्विशिष्टो विधीयते। तेन एकार्थत्वं विभागे च साकाङ्क्षत्वम्' इत्येकवाक्यत्वम्[1] उपपद्यते। नन्वर्थभेदो, यागश्चैवं ह्यपूर्वः कर्त्तव्यः, रेवतीषु वारवन्तीयम् अपूर्वमिति। नेति ब्रूमः। निर्वृत्तवारवन्तीयरेवतीगुणको यागो विधीयते, न वारवन्तीयनिर्वृत्तिः। अर्थाद् रेवतीषु वारवन्तीयमभिनिर्वर्त्स्यति। शक्यते च तन्निर्वर्त्तयि-

---

यह लेना होगा कि—त्रिवृदग्निष्टुत्……ब्रह्मवर्चसकामो यजेत और एतस्यैव रेवतीषु……पशुकामो ह्येतेन यजेत सदृश समानरूप के भिन्न वाक्यों में कर्मयुक्त फल होता है। अर्थात् पूर्ववाक्य ब्रह्मवर्चस फल के लिये वायुदेवताक ऋचाओं में एकविंश अग्निष्टोम साम की कल्पना करके त्रिवृत्-अग्निष्टुद् अग्निष्टोम का विधान करता है। और दूसरा वाक्य पशुफल के लिये रेवती ऋचाओं में वारवन्तीय अग्निष्टोम साम की कल्पना करके कर्मविशेष का विधान करता है। इस प्रकार तन्त्रवार्तिक और बृहती दोनों के व्याख्यान उपपन्न हो जाते हैं। भाष्यकार को यहां क्या अभिप्रेत है, इसके विषय में देवा एव ज्ञातुमर्हन्ति कहना ही उपयुक्त होगा।

अस्यापूर्वा रेवतीरुपादाय—अस्य से अग्निष्टुत् अग्निष्टोम का परामर्श है। अभिप्राय यह है कि अग्निष्टुत् अग्निष्टोम में रेवती ऋचाओं का निर्देश न होने पर भी वचन-सामर्थ्य से अपूर्व रेवती ऋचाओं को ग्रहण करके उनमें वारवन्तीय साम का गान करके एतेन इस अग्निष्टुत् अग्निष्टोम से यजन करे। इसमें एतेन यजेत पूर्व अग्निष्टुत् अग्निष्टोम का अनुवाद है। दूसरे शब्दों में कहा जा सकता है—एतम् अग्निष्टुतम् अग्निष्टोमम् उद्दिश्य रेवत्य ऋचः तासु च वारवन्तीयं साम कृत्वा पशुफलं भावयेत् =उक्त अग्निष्टुत् अग्निष्टोम याग को उद्देश करके रेवती ऋचाओं और उनमें वारवन्तीय साम करके पशुओं को सिद्ध (=प्राप्त) करे। तथाग्निष्टोमसामेति नावकल्प्येत—उक्त अर्थ में वारवन्तीयमग्निष्टोमसाम कृत्वा में पठित अग्निष्टोम साम का सम्बन्ध नहीं होता है, अर्थात् वह वारवन्तीय अग्निष्टोम साम नहीं होता है।

व्याख्या—(आक्षेप) अच्छा तो कर्मान्तर मानने में वाक्यभेद कैसे नहीं होगा? (समाधान) 'रेवती ऋचाओं में [अग्निष्टोम साम के कार्य में] वारवन्तीय साम को करके पशुकामनावाला यजन करे'। इस प्रकार सब विशेषणों से विशिष्ट अपूर्व याग का विधान किया जाता है। इससे 'एकार्थता और [उसके] विभाग करने पर साकाङ्क्षता' होने से एकवाक्यत्व उपपन्न होता है। (आक्षेप) इस प्रकार भी वाक्यभेद होता है, और याग भी अपूर्व करना चाहिये, और रेवती ऋचाओं में वारवन्तीय साम भी अपूर्व करना चाहिये। (समाधान) [वाक्यभेद] नहीं है, ऐसा हम कहते हैं। निष्पन्न वारवन्तीय और रेवती गुणवाले सम्पन्न याग का विधान किया जाता है, केवल वारवन्तीय साम की निर्वृत्ति (=निष्पन्नता) नहीं कही जाती है। अर्थापत्ति सामर्थ्य से रेवती ऋचाओं में वारवन्तीय साम निष्पन्न हो जायेगा। और वह [रेवती ऋचाओं में]

---

१. द्र०—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात्। मी० २।१।४६॥

तुम्। उच्यते—रेवतीनां वारवन्तीयस्य च सम्बन्धो न विहितः स्यात्। तत्र च रेवतीष्वन्यान्यपि सामानि भवेयुः। वारवन्तीयं चान्यास्वपि ऋक्षु। नैष दोषः। कृत्वेत्यभिनिर्वृत्तः सम्बन्धो यागायोच्यते। तेन सम्बन्धो गम्यते। द्वावप्येतावर्थौ कृत्वेत्येष शब्दः शक्नोति वदितुम्—अभिनिर्वृत्तिं पूर्वकालतां च। यथा शोणमानयेति रक्तगुणसम्बद्धोऽश्वः शब्देनैवानयतो विधीयते इति। न वाक्यभेदो भवति। एवमत्रापि द्रष्टव्यम्।

निष्पन्न किया जा सकता है, अर्थात् गाया जा सकता है।(आक्षेप) [ऐसा विधान करने पर] रेवती ऋचाओं का और वारवन्तीय साम का संबन्ध विहित नहीं होगा। उस अवस्था में रेवती ऋचाओं में अन्य साम भी प्राप्त होंगे। और वारवन्तीय साम अन्य ऋचाओं में भी गेय होगा।(समाधान) यह दोष नहीं है। 'कृत्वा' शब्द से [रेवती ऋचाओं में वारवन्तीय साम का] निष्पन्न हुआ सम्बन्ध याग के लिये कहा जाता है। इससे [रेवती ऋचाओं और वारवन्तीय साम का] सम्बन्ध जाना जाता है। इन दोनों ही [रेवती ऋचाओं में वारवन्तीय साम की] अभिनिर्वृत्ति (=निष्पन्नता) और पूर्वकालता अर्थों को 'कृत्वा' यह शब्द कह सकता है। जैसे शोणम् आनय (=शोण को लाओ) शब्द के द्वारा ही रक्तगुणसंबद्ध अश्व लानेवाले के प्रति विहित होता है। वाक्यभेद नहीं होता है। इसी प्रकार यहां भी जानना चाहिये।

विवरण—कथमवाक्यभेदः—आक्षेप करनेवाले का भाव यह है कि कर्मान्तर का विधान करने पर भी तो अपूर्व रेवती ऋचाओं के उपादान, और उनमें अग्निष्टोम साम के कार्य में वारवन्तीय साम का विधानरूप दो का विधान करने पर वाक्यभेद होगा ही। **सर्वैर्विशेषणैर्विशिष्टः**—समाधाता का भाव यह है कि अपूर्व यागविधि में अनेक विशेषणों से विशिष्ट कथन होने से वाक्यभेद नहीं होता है। जहां किसी पूर्व वचन से विहित याग का अनुवाद करके अन्य वचन से एक से अधिक गुणों का विधान किया जाता है, वहां वाक्यभेद होता है। जैसे अग्निहोत्रं जुहुयात् से विहित अग्निहोत्र का अनुवाद करके दध्नेन्द्रियकामस्य जुहुयात् वाक्य में होम को उद्देश करके दधि गुण का विधान करें, तो इन्द्रियफल का सम्बन्ध नहीं होगा। और यदि इन्द्रियफल का विधान करें, तो दधि का सम्बन्ध नहीं होगा। और यदि जुहुयात् के साथ दोनों का सम्बन्ध जोड़ें, तो दध्ना जुहुयात् और इन्द्रियकामो जुहुयात् (=इन्द्रियरूपं फलं भावयेत्) दो वाक्य होंगे (द्र०—मी २।२।२५ सूत्रभाष्य का अन्तिम सन्दर्भ)। **एकार्थत्वं विभागे च साकाङ्क्षत्वम्**—भगवान् जैमिनि ने अर्थैकत्वादेकं वाक्यम् साकाङ्क्षम् चेद् विभागे स्यात् (मी० २।१।४६) सूत्र द्वारा एकवाक्य का जो लक्षण दर्शाया है, उसकी ओर यह संकेत है।

अर्थात्—अर्थात् अर्थापत्ति से। जब निष्पन्न वारवन्तीय साम और रेवतीगुणवाले याग का कथन किया गया, तो अर्थापत्ति से ही यह बात जानी जाती है कि रेवती ऋचाओं और वारवन्तीय साम का परस्पर सम्बन्ध है। ऋचा और साम का सम्बन्ध आश्रयाश्रयीभावरूप ही है—ऋच्यध्यूढं साम गीयते (=ऋचाओं पर साम गाया जाता है)। **उच्यते**—आक्षेप्ता सिद्धान्ती के कथन

नन्वेवमपि बहवोऽर्थाः—रेवत्यः, वारवन्तीयं, तत्सम्बन्धः, यागः, पशुकामश्चेति । नैष दोषः । बहवः श्रूयन्ते, एकोऽत्र विधीयते यागो विशिष्टः । ननु रेवत्योऽपि विधीयन्ते, वारवन्तीयमपि । यदि न विधीयेरन्, नैव तद्विशिष्टो यागः प्रतीयेत । न ह्यविधाय विशेषणं शक्यते विशिष्टो विधातुम् । तस्माद् बहुषु विधीयमानेषु नैकार्थ्यम् । अत्रोच्यते—अर्थ इति प्रयोजनमभिधीयते[1] । यावन्ति पदान्येकं प्रयोजनमभिनिर्वर्त्तयन्ति, तावन्त्येकं वाक्यम् । न चात्र बहूनि प्रयोजनानि । न ह्यत्रानेकस्याभिप्रेतस्यानेकं पदं विधायकमस्ति । रेवतीष्विति नैतत्केवलं रेवतीनां विधायकम् । रेवतीषु वारवन्तीयमित्यत्रापि पदद्वये वारवन्तीयशब्दो द्वितीयान्तः । नास्मात् सम्बन्धोऽभिप्रेतो गम्यते । प्रातिपदिकार्थेऽ-

---

को यथावत् न समझकर आक्षेप करता है—तत्र रेवतीषु इति । द्वावप्यर्थौ कृत्वेत्येष शब्दः—कृत्वा शब्द में दो अंश हैं—'कृ' धातु और 'क्त्वा' प्रत्यय । अतः रेवतीषु वारवन्तीयं साम कृत्वा कहने से रेवती ऋचाओं में वारवन्तीय साम की निष्पत्ति 'कृ' धातु से कही गई । और पूर्वकालता को क्त्वा प्रत्यय ने कहा—समानकर्तृकयोः पूर्वकाले [क्त्वा] (अष्टा० ३।४।२१) । शोणमानय—शोण का अर्थ लाल रंग है । परन्तु यह केवल लाल रंगवाले अश्व के लिये ही प्रयुक्त होता है । महाभाष्यकार पतञ्जलि ने कहा है—समाने रक्ते वर्णे गौर्लोहित इति भवति, अश्वः शोणः; समाने च काले वर्णे गौः कृष्ण इति भवति, अश्वो हेम इति; समाने च शुक्ले वर्णे गौः श्वेत इति भवति, अश्वः कर्क इति (महा० १।२।६८-७१; २।२।२९) । इस प्रकार शोण शब्द के कहने से रक्त वर्ण के साथ अश्व का भी स्वतः बोध हो जाता है । न वाक्यभेदो भवति—यह नहीं कहना पड़ता—शोणम् आनय, अश्वं चानय (=लाल रंगवाले को लाओ, और अश्व को लाओ) ।

व्याख्या—(आक्षेप) इस प्रकार भी तो बहुत अर्थ [विधीयमान होते] हैं—रेवती ऋचाएं, वारवन्तीय साम, उन [दोनों] का सम्बन्ध, याग और पशुकाम । [इन बहुत अर्थों के विधीयमान होने पर वाक्यभेद होगा ।] (समाधान) यह दोष नहीं है । बहुत अर्थ सुने जाते हैं, परन्तु यहां एक[सब विशेषणों से] विशिष्ट याग का ही विधान किया जाता है । (आक्षेप) रेवती ऋचाओं का भी विधान किया जाता है, और [उनमें] वारवन्तीय साम का भी । यदि [इनका] विधान न करें, तो उन से विशिष्ट याग प्रतीत ही न होवे । विशेषणों का बिना विधान किये विशिष्ट का विधान नहीं किया जा सकता है । इसलिये बहुतों के विधीयमान होने से एकार्थकता नहीं है । (समाधान) इस विषय में कहते हैं—[अर्थैकत्वाद् एकं वाक्यम् (मी० २।१।४६) सूत्र में] अर्थ शब्द से प्रयोजन कहा जाता है । जितने पद एक प्रयोजन को सिद्ध करते हैं, उतने पद एक वाक्य कहाते हैं । प्रकृत में बहुत प्रयोजन नहीं है । यहां अनेक अभिप्रेत प्रयोजनों के अनेक पद विधायक नहीं हैं । रेवतीषु पद केवल रेवती ऋचाओं का विधायक नहीं है । रेवतीषु वारवन्तीयम् (=रेवती ऋचाओं में वारवन्तीय सोम को) यहां भी दोनों पदों में वारवन्तीयम् शब्द द्वितीया विभक्त्यन्त है । इस[द्वितीयान्त वारवन्तीय] शब्द से सम्बन्ध अभिप्रेत है, ऐसा नहीं जाना

---

१. 'अर्थैकत्वादेकं वाक्यम्' (मी०२।१।४६) इत्यस्मिन् सूत्रे इति शेषः ।

स्य व्यतिरेकात् । कृत्वेत्यपि करोतिर्न सम्बन्धमात्रे पर्य्यवसितः, परप्रयोजनसम्बन्धमाह । एवं विशिष्टस्तु यजतिर्न परार्थः । तदेकमेषां पदार्थानां प्रयोजनम् । तस्मादेकवाक्यत्वम् । गुणे पुनः फले प्रकल्प्यमाने अग्निष्टोमसाम्नः कार्ये वारवन्तीयम्, एतस्य च यदग्निष्टोम-साम, इति वाक्यभेदः स्यात् ।

जाता है । प्रातिपदिक अर्थ में इस[द्वितीया विभक्ति के अर्थ]के पृथक् होने से(विवरण द्रष्टव्य) । कृत्वा में भी करोतिः (='कृ' धातु) सम्बन्धमात्र (=सम्बन्ध-विधानमात्र) में समाप्त नहीं होती है, [क्त्वान्त होने से] अन्य [यजेत पदस्थ यागरूप] प्रयोजन के संबन्ध को भी कहती है । इस प्रकार [सब विशेषणों से]विशिष्ट तो यजतिः (=यज धातु) परार्थ नहीं है [बोधित याग को कहनेवाली है] । इसलिये इन पदार्थों का [याग को विधान करनारूप] एक प्रयोजन है । इसलिये यहां एकवाक्यत्व है । गुण के निमित्त से फल की कल्पना करने पर अग्निष्टोमसाम के कार्य में वारवन्तीय का विधान करना होगा, और इस [अग्निष्टुत् अग्निष्टोम का] जो अग्निष्टोम-साम है, इस प्रकार वाक्यभेद होगा । [अर्थात् एतस्य(=इस अग्निष्टुत् अग्निष्टोम क्रतु का)यत् अग्निष्टोमसाम वर्तते (=जो अग्निष्टोम साम है), तस्याग्निष्टोमसाम्नः कार्ये (=उस अग्निष्टोम सामसम्बन्धी कार्य में) वारवन्तीयं कृत्वा (=वारवन्तीय सोम गाकर)पशुकाम-फलं भावयेत् (=पशुकामरूप फल की सिद्ध करे) इस प्रकार वाक्यभेद होगा ।

विवरण— प्रातिपदिकार्थेऽस्य व्यतिरेकात्—वारवन्तीयम् द्वितीयान्त शब्द में द्वितीया विभक्ति का जो कर्म अर्थ है, वह प्रातिपदिकार्थ से भिन्न है । यदि प्रातिपदिकार्थमात्र विवक्षित होता तो वार-वन्तीयम् प्रथमान्त होता । प्रथमान्त होने पर रेवतीषु वारवन्तीयं साम भवति वाक्यार्थ होने पर रेवती ऋचाओं और वारवन्तीय साम का सम्बन्ध हो सकता था । यदि कहो कि सामवाचक वार-वन्तीय शब्द के नपुंसकलिङ्ग होने से प्रथमा और द्वितीया विभक्ति में समान ही रूप होगा । ऐसी अवस्था में इसे प्रथमान्त क्यों न माना जाये ? इसका उत्तर यह है कि वारवन्तीयं कृत्वा में कृत्वा पद का प्रयोग वारवन्तीयं द्वितीयान्त ही है, यह इसका बोधक है । प्रथमान्त के साथ कृत्वा शब्द का प्रयोग नहीं हो सकता है । करोतिर्न सम्बन्धमात्रे—इस वाक्य का भाव यह है कि कृत्वा पदगत कृञ् धातु रेवतीषु वारवन्तीयं करोति इस सम्बन्धमात्र के बोध में समाप्त नहीं होती है । क्योंकि यहां पूर्वकाल को कहनेवाला क्त्वा प्रत्यय भी प्रयुक्त है । परप्रयोजनसंबन्धमाह —यह क्त्वाप्रत्यय पूर्वक्रिया और उत्तरक्रिया के सम्बन्ध को कहता है । भुक्त्वा देवदत्तो ग्रामं गतः वाक्य में भुक्त्वा पदस्थ क्त्वा प्रत्यय जैसे पूर्वकालिक भोजनक्रिया और उत्तरकालिक गमनक्रिया दोनों के सम्बन्ध को बोधित करता है, उसी प्रकार रेवतीषु वारवन्तीयं कृत्वा यजेत(=रेवती ऋचाओं में वारवन्तीय साम को गाकर यजन करे) में रेवती ऋचाओं और वारवन्तीय साम के सम्बन्ध को कहता हुआ 'यजन करे' को भी सम्बद्ध करता है । यजतिर्न परार्थः—इसका भाव यह है कि सब विशेषणों से विशिष्ट याग अग्निष्टुत् अग्निष्टोमं यागमुद्दिश्य रूप पर=अनुवादरूप प्रयोजन के लिये नहीं है, अपि तु याग के विधान के लिये है ।

अथोच्येत—'रेवत्यादिसर्वविशेषणविशिष्टो याग एतस्याग्निष्टुतो विधीयेत।' तथापि पशुकामसम्बन्धाद् भिद्येत वाक्यम्। अथैवमुच्येत—'रेवतीषु कृतेन वारवन्तीयेन पशुकामो यजेत'इति। नैवं शक्यम्। ऋगन्तरप्रगाणाद्विशेषहानाद्वैगुण्यं स्यात्। नन्विदानोमेवोक्तम्—'शक्यते हि रेवतीषु वारवन्तीयं कर्त्तुम्' इति। सति वचने शक्यम्। असति वचने न वारवन्तीयग्रहणेन गृह्यन्ते। वचनं तर्हि भविष्यति—पशुकामो रेवतीषु वारवन्तीयमभिनिर्वर्त्तयेत्। ततो यजेतेति यजतिरनुवादः। यदि वचनं रेवतीषु वारवन्तीयसम्बन्धस्य, सिद्धं कर्मान्तरम्, नाग्निष्टुतो गुणविधिः। ननु ततो यजेतेति यागानुवादाद् यागेनास्याङ्गप्रयोजनसम्बन्धो भविष्यति। नैवं शक्यम्। यागं प्रत्यङ्गभावे विधीयमाने पशुकामं प्रत्यसम्बन्धः। उभयसम्बन्धे वाक्यं भिद्येत। अथ यागसम्बन्धोऽनुवादः, प्रकरणेन चाङ्गता, नेदमुपपन्नम्। प्रकरणाद्धि वाक्यं बलवत्तरम्। तस्मात् कर्मान्तरम्। यागगुणकं

व्याख्या—और यदि यह कहो कि—'रेवत्यादि सब विशेषणों से विशिष्ट याग इस अग्निष्टुत् का विधान किया जाये'। तब भी पशुकाम के सम्बन्ध से वाक्यभेद होवे। [अर्थात् सर्व-विशेषण-विशिष्ट अग्निष्टुत् याग विधायक वाक्य से भिन्न पशुकामो यजेत यह दूसरा वाक्य मानना पड़ेगा।] और यदि इस प्रकार कहो कि—'रेवती ऋचाओं में किये गये (=गाये गये) वारवन्तीय साम से पशुकामनावाला यजन करे'। यह भी नहीं बन सकता। [वारवन्तीय साम की योनिभूत अश्वं न त्वा वारवन्तम् ऋक्, और उसकी सहचरी स घा नः, तथा स नो दूरात् ऋचाओं में गेय वारवन्तीय साम(द्र०—ऊहगान, काशी वि० वि० संस्क० पृष्ठ ३८४)को] ऋगन्तर [रेवती ऋचाओं] में गान करने [और अपनी] विशेष ऋचाओं के परित्याग से वैगुण्य होगा। (आक्षेप) अभी तो आपने कहा था—'रेवती ऋचाओं में वारवन्तीय साम किया (=गाया) जा सकता है'। (समाधान) [यदि रेवती ऋचाओं में वारवन्तीय गान का विधायक] वचन होवे, तो हो सकता है। [रेवती ऋचाओं के विधायक] वचन के न होने पर वारवन्तीय के ग्रहण से [रेवती ऋचाएं] गृहीत नहीं होती। (आक्षेप) अच्छा तो [रेवती ऋचाओं का विधायक] वचन हो जायेगा—पशु की कामनावाला रेवती ऋचाओं में वारवन्तीय साम को सम्पादित करे। तदनन्तर 'यजेत' में यजतिः (=यज धातु) अनुवाद होगा। (समाधान) यदि रेवती ऋचाओं में वारवन्तीय साम के सम्बन्ध का विधायक वचन है, तो कर्मान्तर सिद्ध है, अग्निष्टुत् की गुणविधि नहीं होगी। (आक्षेप) तब तो अनन्तर यजेत से याग का अनुवाद होने से याग के साथ इसका (=रवती ऋचाओं में गेय वारवन्तीय का) अङ्ग रूप से सम्बन्ध हो जायेगा। (समाधान) ऐसा नहीं कर सकते। [रेवती ऋचाओं में गेय वारवन्तीय साम का] याग के प्रति अङ्गरूप से विधान करने पर [रेवती ऋचाओं में गेय वारवन्तीय साम का] पशुकाम के साथ संबन्ध नहीं होगा। दोनों के साथ संबन्ध करने पर वाक्यभेद होगा ['अग्निष्टुतं यागमुद्दिश्य रेवतीषु वारवन्तीयं कुर्यात्' एक वाक्य होगा, और पशुकामो यागेन पशुरूपं फलं भावयेत् दूसरा वाक्य बनेगा]। और यदि याग का सम्बन्ध [यजेत से] अनुवादरूप है, और वारवन्तीय साम की अग्निष्टुत् याग के प्रति अङ्गता प्रकरण से है, [ऐसा कहो तो] यह उपपन्न नहीं होता है। प्रकरण से वाक्य बलवान् होता है। इसलिये [वाक्यप्रमाण से] कर्मान्तर है। याग के गुणवाला रेवती ऋचाओं में

वा रैवतीषु वारवन्तीयम्, तद्गुणको वा यागः। तत्र यागपशुकामयोः सम्बन्धस्य विधात्रीं यजतेरुपरितनीं विभक्तिमुपलभामहे लिङम्[1]। न तु रेवतीवारवन्तीयसम्बन्धस्य विधायकं साक्षात् किञ्चिदुपलभ्यते। तस्मात् सर्वविशेषणविशिष्टो यागः पशुकामस्य विधीयते, इति सिद्धम्।

अथ पुनर्विशिष्टे यागे विधीयमाने तद् रेवतीषु वारवन्तीयं कथमग्निष्टोमसाम भवतीति? उच्यते, वचनादग्निष्टोमसाम्नः कार्ये भविष्यतीति। किमिव हि वचनं न कुर्यात्? नास्ति वचनस्यातिभारः। अथ यदुक्तम्—'एतस्यैवेति अनन्तरापेक्षं वचनम्'[2] इति। तत्राप्यविरोधादेतद्धर्मकस्येति लक्षणाशब्दो भविष्यति। तस्मान्न गुणात् फलम्। कर्मान्तरमेवंधर्मकमिति। सिद्धं समन्वेवञ्जातीयकेषु कर्मयुक्तं फलमिति ॥२७॥ इति वारवन्तीयादीनां कर्मान्तरताऽधिकरणम् ॥१२॥

वारवन्तीय साम होवे, अथवा उस (=रेवती ऋचाओं में वारवन्तीय साम) गुणवाला याग होवे। इस विषय में याग और पशुकाम के सम्बन्ध की विधायिका आगे पठित यजेत लिङ् विभक्ति को हम उपलब्ध करते हैं। रेवती ऋचाओं और वारवन्तीय साम के सम्बन्ध का विधायक कोई पद साक्षात् उपलब्ध नहीं होता है। इसलिये सब विशेषणों से विशिष्ट याग पशुकामनावाले के लिये विधान किया जाता है, यह सिद्ध होता है।

(आक्षेप) अच्छा तो विशिष्ट याग के विधीयमान होने पर वह रेवती ऋचाओं में गीयमान वारवन्तीयसाम अग्निष्टोमसाम कैसे होता है? (समाधान) वचनसामर्थ्य से अग्निष्टोमसाम के कार्य में (=अग्निष्टोम स्थानीय) [रेवती ऋचाओं में गेय वारवन्तीयसाम] होगा। वचन क्या नहीं करेगा? वचन के प्रति कोई अतिभार नहीं है। और जो यह कहा है (द्र०—पृष्ठ ५०८) कि—'एतस्यैव यह वचन अनन्तर (=समीप में पठित याग) की अपेक्षा से है।' उस विषय में भी विरोध न होने से इस [सर्वविशेषणविशिष्ट] धर्मवाले याग के लिये लाक्षणिक शब्द हो जायेगा। इसलिये गुण से फल नहीं होता है। और इस धर्मवाला कर्मान्तर है। समानरूप के इस प्रकार के वाक्यों में कर्मयुक्त फल होता है, यह सिद्ध हो जाता है ॥२७॥

विवरण—कथमग्निष्टोमसाम भवति - का तात्पर्य यह है कि वारवन्तीयसामयुक्त कर्मान्तर होने पर उसका अग्निष्टोम विशेषण उपपन्न नहीं होगा। अग्निष्टोमसाम्नः कार्ये—अग्निष्टोमसंस्थाक सोमयाग में अग्निष्टोमसाम से कर्म का समापन होता है, यह हम पूर्व (पृष्ठ ५०७) कह चुके हैं। अतः जैसे अग्निष्टोमसंस्था में अग्निष्टोमसाम कर्म का समापक है, उसी प्रकार प्रकृत कर्म में अग्निष्टोम साम की जगह वारवन्तीय साम कर्म का समापक होता है।

---

१. लिङ्गमिति सार्वत्रिकोऽपपाठः। उपरिनिर्दिष्ट आचार्यचरणैः संशोधितः पाठः। 'लिङः' इति तु वयं प्रतीमः 'विभक्तिं लिङः' इत्यर्थस्य स्पष्टतायै। विभक्तिसंज्ञा तिप्तस्झिप्रभृतीनां भवति (द्र०—'विभक्तिश्च' अष्टा० १।४।१०४), न लिङः।

२. द्र०—एतेन यजेत इति विदितस्यैवैतद् वचनम्, नाविदितस्य। पृष्ठ ५०८।

[सौभरनिधनयोः कामैक्याऽधिकरणम् ॥१३॥]

व्याख्या—दर्शपूर्णमास याग हैं । उनमें पढ़ते हैं=स्फ्यश्च कपालानि च, अग्निहोत्रहवणी च शूर्पं च, कृष्णाजिनं च शम्या च, उलूखलं च, दृषच्चोपला च । एतानि वै दश यज्ञायुधानि (=स्फ्य, कपाल, अग्निहोत्रहवणी, शूर्प, कृष्णाजिन=कालेमृग का चर्म, शम्या उलूखल मूसल दृषद् और उपल । ये निश्चय से यज्ञ के दश आयुध हैं) । इनके विषय में सन्देह होता है—जो कोई कर्म यहां यज्ञ में जिससे किया जा सकता है उस उस के लिये ये पात्र पठित हैं अथवा जो पात्र जिस कर्म के साथ [उत्पत्ति वाक्य में] सम्बद्ध है, उसी के लिये हैं । तो क्या प्राप्त होता है ? जो कर्म जिससे किया जाये [वह उस से करे] । किस हेतु से ? इस प्रकार से विधियां [यथावत्] उपपन्न होंगी और [स्फ्यादि पात्र] अर्थवान्

---

१. तै० सं० १।६।८ ॥

एवं विधयो भविष्यन्ति तथार्थवन्तः। इतरथा ते अनुवादा निष्प्रयोजनाः। प्रकरणाविशेषश्च सर्वपदार्थान् प्रति। यज्ञायुधानीति च यज्ञसंयोगोऽविशिष्टः। तस्मात् सर्वं सर्वत्र इत्येवं प्राप्तम्॥ एवं प्राप्ते ब्रूमः—

द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत॥११॥

द्रव्यञ्चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत। यो येन पदार्थेन सहोत्पत्तिवाक्येन

होंगे। अन्यथा वे [स्फ्यादि] अनुवाद होते हुए निष्प्रयोजन होंगे। प्रकरण की सामान्यतासब पदार्थों के प्रति है। और यज्ञायुधानि यह यज्ञसंयोग [सब के साथ] अविशिष्ट (=सामान्य) है। इसलिये सभी [स्फ्यादि] सर्वत्र (=सब कार्यों में (प्रयुक्त होवें), ऐसा प्राप्त होता है। ऐसा प्राप्त होने पर कहते हैं—

विवरण—पूर्व अधिकरण में भी श्रूयमाण द्रव्यों का सभी कर्मों के साथ सम्बन्ध है अथवा उत्पत्ति वाक्य में जिस कर्म के साथ जो द्रव्य सुना जाता है, उसी के साथ उस कर्म का संबन्ध है। यह विचार किया है। इस अधिकरण में भी द्रव्य और कर्म के परस्पर सम्बन्ध का विचार किया है। इसलिये दोनों में भेद जानना आवश्यक है। प्रथम अधिकरण व्रीहीन् अवहन्ति इत्यादि उत्पत्ति वाक्यों में ही द्रव्य का निर्देश है। अर्थात् एक ही वार निर्देश है। इसके साथ ही अदृष्ट और दृष्ट उभय प्रयोजनों की सम्भावना कही है। प्रकृत अधिकरण एक से अधिक वार द्रव्यों (=पात्रों) का निर्देश है। स्फ्येनोद्धन्ति, कपालेषु पुरोडाशान् श्रपयति वाक्यों में पृथक् पृथक् रूप से स्फ्यादि का निर्देश है और स्फ्यश्च कपालानि च में पुनः निर्देश किया है और इन्हें सामान्यरूप से यज्ञायुध कहा है। साथ ही यहां अदृष्ट के अभाव होने से और दृष्ट प्रयोजन की समानता होने से पूर्व विचार से भिन्नता है। स्फ्यश्च कपालानि च—यहां द्वन्द्व का निर्देश द्वे द्वे सम्भरति (तै० सं० १।८।६)=दो दो पात्रों को वेदि में रखता है, विधि की उत्पत्ति के लिये है (काशिका ८।१।१५ में उद्धृत द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति धीरः वचन भी दृष्टव्य है)। एतानि वै दश यज्ञायुधानि—स्फ्य आदि को यज्ञों का आयुध=साधन कहा है। अथर्ववेद १०।४।१ के स्रुचो यज्ञायुधानि वचन में स्रुचों को यज्ञायुध कहा है। यज्ञ कर्म की संग्राम से तुलना शतपथ १।५।३।६ के की—संग्रामो वा एष सन्निधीयते यः प्रयाजैर्यजते वचन में भी की है। इतरथा ते अनुवादाः—इसका तात्पर्य है कि स्फ्येनोद्धन्ति आदि में स्फ्य आदि का निर्देश होने पर स्फ्यश्च कपालानि च वाक्य में स्फ्य आदि का अनुवादमात्र होगा और अनुवाद होने से स्फ्य आदि का निर्देश निष्प्रयोजन होगा।

द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत॥११॥

सूत्रार्थः—(द्रव्यम्) द्रव्य=स्फ्य कपाल आदि (उत्पत्तिसंयोगात्) उत्पत्ति विधायक स्फ्येनोद्धन्ति कपालेषु पुरोडाशं श्रपयति आदि वाक्यों में उद्धनन श्रपण क्रियाओं के संयोग से (तदर्थम्) उसी उद्धनन श्रपण आदि अर्थ=प्रयोजन के लिये (एव) ही (चोद्येत) कहे जायेंगे। अर्थात् जिस द्रव्य के साथ उत्पत्ति वाक्य में जो क्रिया श्रुत है उसी के लिये होंगे।

व्याख्या—द्रव्य भी उत्पत्ति वाक्य से कर्म के साथ संयुक्त होने से उसी के लिये कहा

संयुक्तः, स पदार्थः तेनैव कर्त्तव्यः। यथा स्फ्येनोद्धन्ति[1] इत्युद्धननार्थता स्फ्यस्य वाक्येन। तदुद्धननं न स्फ्यादन्येन कर्त्तव्यम्। यदा चैवं, तदा प्राप्त एव स्फ्यः। तस्यायमनुवादो भवितुमर्हति—एतानि वै दश यज्ञायुधानि इति। एवमेकैकस्यानुवादः, तेन तेन वचनेन प्राप्तस्य। यथा—कपालेषु श्रपयति[2], अग्निहोत्रहवण्या हवींषि निर्वपति[3], शूर्पेण विविनक्ति[4], कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति[5], शम्यायां दृषदमुपदधाति[6], उलूखलमुसलाभ्यामवहन्ति[7],

---

जावे। जो जिस पदार्थ के साथ उत्पत्ति-वाक्य में संयुक्त है, वह पदार्थ उसी से करना चाहिये। जैसे स्फ्येनोद्धन्ति (=स्फ्य से वेदि को खोदता है) से उद्धनन-प्रयोजनता स्फ्य की वाक्य से जानी जाती है। इसलिये वह उद्धननकार्य स्फ्य से अन्य [द्रव्य] से नहीं करना चाहिये। जब ऐसा है, तब स्फ्य प्राप्त ही है। उसका यह अनुवाद हो सकता है—एतानि वै दश यज्ञायुधानि (=ये दश यज्ञ के आयुध=साधन हैं)। इस प्रकार उस-उस [उत्पत्तिवाक्य] से प्राप्त एक-एक का अनुवाद है। जैसे—कपालेषु श्रपयति (=कपालों में पुरोडाश को पकाता है), अग्निहोत्रहवण्या हवींषि निर्वपति (=अग्निहोत्रहवणी से हवियों का निर्वाप करता है), शूर्पेण विविनक्ति (=शूर्प से तण्डुलों को सूक्ष्म कणों से अलग करता है), कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति (=काले मृग के चर्म को ऊखल के नीचे बिछाता है), शम्यायां दृषदमुपदधाति (=शम्या पर दृषद्=शिला को रखता है), उलूखलमुसलाभ्यामवहन्ति (=ऊखलमूसल से व्रीहि को

---

१. दर्शपूर्णमासे नोपलब्धं वचनम्। द्र०—वेद्युद्धननप्रकारः कात्या० श्रौत……निदधाति ……तृणेऽन्तर्हिते प्रहरति (स्फ्येनेत्यनुवर्तनात्)। स्फ्येन वेदिमुपहन्ति (तै सं० ६।६।४) इति सोमयागे श्रूयते।

२. द्र० —उत्तानेषु कपालेष्वधि श्रयति। तै० सं० २।३।६।। आग्नेयं पुरोडाशमष्टाकपालेष्वधिश्रयति। आप० श्रौत १।२४।६।।

३. आप० श्रौत १।१७।६।।

४. अनुपलब्धमूलम्। द्र०—वायुर्वै इति विविनक्ति। कात्या० श्रौत २।४।२०।।'हे तण्डुलाः! वायुशूर्पचालनेनोत्थः वो युष्मान् विविनक्तु सूक्ष्मकणेभ्यः पृथक् करोतु'। इति महीधरभाष्यम्, मा० सं० १।१६।।

५. द्र०—[कृष्णाजिनं] प्रत्यग्रीवमस्तृणाति, अदित्यास्त्वग् इति। सव्याशून्ये निदधात्युलूखलम्……। कात्या० श्रौत २।४।३-४।। अत्र आप० श्रौत १।१९।४-५ सूत्रे अपि द्रष्टव्ये।

६. काशीमुद्रिते 'शम्यां दृषदुपदधाति' इत्यपपाठः। अनुपलब्धमूलं वचनम्। द्र०—कुम्बां शम्यां निधाय धिषणासि पर्वत्येति शम्यायां दृषदुपलामत्यादधाति। आप० श्रौत १।११।३।।

७. अनुपलब्धमूलम्। द्र०—आप० श्रौत १।१९।५,६,७।।

दृषदुपलाभ्यां पिनष्टि[1] इति । प्रकरणात् सर्वाणि सर्वत्र प्राप्नुयुः, वचनात्तु यथावचनम् । यज्ञायुधशब्दोऽपि सामान्येन प्रयोजनं विदधत् अर्थेन तद् विदध्यात् । स विशेषेण बाध्येतैव[2] । परोक्षं हि सामान्यवचनेन विशेषविधानं भवति। प्रत्यक्षन्तु विशेषवचनेन विशेषविधानम् । तस्माद् यद् येनोत्पत्त्या संयुक्तं, तत् तत्रैव विनियुज्यते इति सिद्धम् ॥११॥ इति स्फ्यादीनां संयोगानुसारेण व्यवस्थितत्वाऽधिकरणम् ॥५॥

[अरुणादीनां गुणानामसंकीर्णताऽधिकरणम् ॥६॥]

ज्योतिष्टोमे क्रयं प्रकृत्य श्रूयते—अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति[3] इति । तत्र सन्देहः—किम् अरुणिमा कृत्स्नप्रकरणे निविशेत, उत क्रय एवैकहायन्यामिति ? कथं

कूटता है), दृषदुपलाभ्यां पिनष्टि (=शिला और लोढी से तण्डुलों=चावलों को पीसता है) । प्रकरण [के समान होने] से सब द्रव्य सब कर्मों में प्राप्त होवें । [स्फ्येनोद्धन्ति आदि] वचनसामर्थ्य से यथावचन (=जैसे वचन में कर्म कहा है) होवे । यज्ञायुध शब्द भी सामान्य रूप से [स्फ्य आदि द्रव्यों के] प्रयोजन का विधान करता हुआ उसे (=सब द्रव्यों को सर्वत्र) विधान करेगा । सामान्य वचन से विशेष अर्थ को कहना परोक्ष होता है । विशेष वचन से विशेष अर्थ को कहना प्रत्यक्ष है । इसलिये जो कर्म जिस द्रव्य के साथ उत्पत्ति वाक्य से संयुक्त है, वह द्रव्य उसी कर्म में ही विनियुक्त होवे, यह सिद्ध होता है ॥११॥

विवरण—इस सूत्र के भाष्य में स्फ्येनोद्धन्ति, कपालेषु श्रपयति आदि वाक्य उद्धृत हैं । वे उसी रूप में हमें किसी ग्रन्थ में उपलब्ध नहीं हुए । इन अभिप्रायों को कहनेवाले वचनों का भाष्य की टिप्पणी में यथास्थान निर्देश कर दिया है । हमारा विचार है कि ये वचन भाष्यकार द्वारा अर्थतः अनूदित हैं ॥११॥

व्याख्या—ज्योतिष्टोम में [सोम के] क्रय का आरम्भ करके सुना जाता है—अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति (=अरुण= लाल पीत मिश्रितवाली, पीले आंखोंवाली, और एक वर्ष की वयः=अवस्थावाली गौ से सोम को खरीदता हैं) । इस में संदेह होता है—क्या अरुणिमा (=लालपीतमिश्रित वर्णत्व) कृत्स्न क्रय-प्रकरण में निविष्ट (=संबद्ध) होती है ?

---

१. अनुपलब्धमूलम् । द्र०—कात्या० श्रौत २।५।३-६॥

२. काशीसंस्करणे 'प्रयोजनं विदधत् तद् बाध्येतैव' इत्यपपाठः ।

३. अनुपलब्धमूलम् । द्र०—एकाहन्या क्रीणाति……अरुणया पिङ्गाक्ष्या क्रीणाति । तै० सं० ६।१।६॥

पुनररुणया क्रीणातीत्येवं विस्पष्टे क्रयसम्बन्धे गम्यमाने संशय इति ? उच्यते—इह हि गुणम् अरुणिमानममूर्त्तं सन्तं क्रियायाः करणम्, इति शब्द उपदिशति। यत् करणाभिधायिन्या तृतीयाविभक्त्या संयुज्य निर्दिशति—अरुणयेति। न चामूर्त्तोऽर्थः क्रियायाः साधनं भवितुमर्हति। अतोऽसम्बन्धं क्रीणातिनाऽरुणगुणस्यावगच्छामः। न च अशकनीयमर्थं प्रमाणभूतः शब्दोऽभिधास्यति, इत्येवं प्रकल्पना कदाचिदुपपद्येताऽपि। केनचित् प्रकारेण सम्बन्ध इति—वचनप्रामाण्यप्रकारान्वेषणे बुद्धिर्भवति। तद् यदि परं विचारयन्तः क्रियासम्बन्धसामर्थ्यमवगमिष्यामः—एकवाक्यतया क्रय एवारुणिमानं निवेशयिष्यामः। अथ त्वप्रमाद्यद्भिरन्विष्यमाणो, न कथञ्चन सम्बन्ध उपपत्स्यते। ततो वाक्यभेदमभ्युपगम्य प्रकरणधर्ममेनमध्यवस्यामः। तस्मादवश्यं विचारणीयमेतदिति।

किं तावत् प्राप्तम् ? कृत्स्ने प्रकरणे निवेशः। कस्मात् ? संयोगतोऽविशेषात्, प्रकरणाविशेषाच्च। ननु प्रकरणाद् वाक्यं बलीयो भवति, इत्येकवाक्यत्वादरुणिमाक्रयेण

अथवा—क्रय में ही एकहायनी गौ में ही संबद्ध होती है ? (आक्षेप) 'अरुणया क्रीणाति' वचन से ही क्रय-सम्बन्ध के विस्पष्ट गम्यमान होने पर कैसे संशय होता है ? (समाधान) यहां अरुणिमा गुण अमूर्त होते हुए क्रिया (=क्रीणाति) का करण है, ऐसा शब्द (=अरुणया क्रीणाति) उपदेश करता है। यतः करण को कहनेवाली तृतीया विभक्ति से संयुक्त होके अरुणया ऐसा निर्देश करता है। अमूर्त अर्थ क्रिया का साधन (=करण) नहीं हो सकता है। इसलिये 'क्रीणाति' क्रिया के साथ अरुण गुण का संबन्ध नहीं है, ऐसा जानते हैं। और अशक्त (=असंभव) अर्थ को प्रमाणभूत शब्द कहेगा, ऐसी कल्पना कभी उपपन्न ही नहीं हो सकती है। किसी प्रकार से [अरुण गुण का] सम्बन्ध होवे, इससे वचन के प्रामाण्य के प्रकार के अन्वेषण में बुद्धि उत्पन्न होती है। इस कारण यदि पूर्ण विचार करते हुए क्रिया के साथ सम्बन्ध के सामर्थ्य को जान लेंगे, तो एकवाक्यता से अरुणिमा को क्रय में ही सम्बन्ध कर देंगे। और यदि हमारे द्वारा प्रमाद न करते हुए (=प्रयत्नपूर्वक) अन्वेषण किया जाता हुआ, किसी प्रकार से [क्रिया के साथ] संबन्ध उपपन्न नहीं होगा, तो वाक्यभेद को स्वीकार करके इसको प्रकरण का धर्म निश्चय करेंगे, अर्थात् मानेंगे। इसलिये यह अवश्य विचारणीय है।

विवरण—अरुणया—अरुणा का अर्थ लाल और पीला मिश्रित वर्ण दोनों होता है। भट्ट भास्कर ने तै० सं० ६।१।६ के अरुणया पिङ्गाक्ष्या का अर्थ करते हुए लिखा है—अरुणा=सान्ध्यवर्णा=सन्धिकाल के लालपीले रङ्गवाली। पिङ्गाक्षी=पीली आंखोंवाली। एकहायन्या—हायन शब्द संवत्सर का वाचक है। एकहायनी=एक वर्ष की।

व्याख्या—तो क्या प्राप्त होता है ? कृत्स्न क्रय-प्रकरण में [अरुणिमा का] निवेश है [अर्थात् जो-जो भी सोमक्रय के साधन कहे हैं, वे सब अरुण वर्ण के होने चाहियें]। किस कारण से ? संयोग के समान होने से, और प्रकरण के समान होने से। (आक्षेप) प्रकरण से वाक्य बलवान् होता है, इसलिये [अरुणया क्रीणाति के] एकवाक्य होने से अरुणिमा का क्रय के साथ ही

सम्भन्त्स्यते इति। नैतदेवमवगम्यते । न हि वचनशतेनाप्यनारभ्योऽर्थः शक्यो विधातुम्। यो हि ब्रूयाद्—'उदकेन दग्धव्यमग्निना क्लेपयिव्यमिति',किं स वचनप्रयोजनसामञ्जस्यमश्नुवीत ? न चामूर्त्तोऽर्थः क्रियायाः साधनमुपपद्यते । तस्मादरुणया क्रीणातीति सम्बन्धाभावादेकवाक्यता न भवतीति ।

ननु नैवायं गुणवचनः। किं तर्हि ?द्रव्यवचनः। कुतः? स्त्रीलिङ्गसम्बन्धात् । द्रव्यविशेषा ह्येते स्त्री पुमान् नपुंसकमिति। स्त्रियां यत् प्रातिपदिकं वर्त्तते, तस्मात् स्त्रीप्रत्ययो भवतीति । स्त्रीप्रत्ययञ्चारुणयेत्युपलभामहे । तस्माद् द्रव्यवचनोऽरुणशब्द इति । तदेतदपेशलम् । तदेव हि द्रव्यमरुणिम्ना परिच्छिद्यमानमरुणाशब्दाभिधानीयतां लभते । तदेवान्यगुणकं नारुणशब्दः शक्नोत्यभिवदितुम् । अरुणिमानमेष शब्दो न व्यभिचरति । व्यभिचरति पुनर्द्रव्यम्। अव्यभिचारि च कारणं कारणवतामिष्टम् । अतोऽस्य गुणः स्वार्थः इति गम्यते । तदस्य प्रत्यक्षतो गुणवचनता गम्यते । स्त्रीप्रत्ययदर्शनात्तु नूनम् अरुणाप्रातिपदिकं द्रव्यवचनमित्यनुमानम् । प्रत्यक्षञ्चानुमानाद् बलीयः। तस्माद् गुणवचनः। कथं तर्हि स्त्रीप्रत्ययसम्बन्धः ? भवति हि गुणवचनस्यापि स्त्रीलिङ्गता। यथा करुणा

सम्बन्ध होगा ? (समाधान) ऐसा नहीं जाना जाता है। सैकड़ों वचनों से भी कहा गया अनारभ्य [=अनुष्ठान के अयोग्य] अर्थ नहीं विधान किया जा सकता है। जो यह कहे कि 'उदक से जलाना चाहिये' 'अग्नि से गीला करना चाहिये', तो क्या वह वचन के प्रयोजन (=अर्थबोधन) के सामञ्जस्य (=स्वारस्य) को प्राप्त होगा ? अमूर्त अर्थ क्रिया का साधन नहीं बन सकता है। इस लिये अरुणया क्रीणाति ऐसे सम्बन्ध के अभाव से एकवाक्यता नहीं होती है।

(आक्षेप) यह [अरुणया शब्द] गुण को कहनेवाला नहीं है। तो क्या है ? द्रव्य को कहनेवाला है। किस हेतु से ? स्त्रीलिङ्ग का सम्बन्ध होने से। स्त्री पुमान् नपुंसक ये द्रव्यविशेष होते हैं। स्त्रीलिङ्ग में जो प्रातिपदिक वर्तमान होता है, उससे स्त्रीप्रत्यय होता है। इस नियम से अरुणया में स्त्रीप्रत्यय को उपलब्ध करते हैं। इसलिये अरुण शब्द द्रव्य वचन है। (समाधान) यह कथन पेशल (=मनोहारी=युक्त) नहीं है। वही द्रव्य अरुणिमा गुण से परिच्छिद्यमान (=विभक्त= पृथक् किया हुआ) अरुणा शब्द की वाच्यता को प्राप्त होता है। उसी अन्य गुणवाले द्रव्य को अरुण शब्द कहने में समर्थ नहीं है। परन्तु [अरुण शब्द] अरुणिमा को व्यभिचरित नहीं करता [अर्थात् अरुणिमा अर्थ को नहीं छोड़ता है]। द्रव्य को छोड़ देता है। कारणवालों में अव्यभिचारी ही कारण इष्ट होता है। इससे इसका स्वार्थ गुण है, ऐसा जाना जाता है। इस प्रकार इस [अरुण शब्द] की गुणवचनता प्रत्यक्ष जानी जाती है। स्त्रीप्रत्यय के दर्शन से तो अरुणा का प्रातिपदिक [अरुण] द्रव्यवचन है, यह अनुमान होता है। प्रत्यक्ष अनुमान से बलवान् होता है। इसलिये [अरुण शब्द] गुणवचन है। (आक्षेप) तो कैसे स्त्रीप्रत्यय का संबन्ध होता है ? (समाधान) गुणवचन की भी स्त्रीलिङ्गता होती है (=देखी जाती है)। जैसे करुणा बुद्धिः [यहां करुणा शब्द गुणवचन होते हुए भी स्त्रीलिङ्ग से संबद्ध है]। इसी प्रकार

बुद्धिः, एवमरुणा इति। गुणवचनश्चेत्, क्रीणातिना न सम्बद्धयते। तस्माद् वाक्यभेदं कृत्वा प्रकरणे सर्वस्मिन्नेव सन्निवेश इति।

अथ यदि क्रीणातिना न सम्बद्धयते,तस्मिन्नेव वाक्ये एकहायनीशब्देन संभन्त्स्यते। न भविष्यति वाक्यभेद इति। तन्न। केवलं हि गुणमरुणाशब्दोऽभिदधाति, न द्रव्यगुणौ। केवलञ्च द्रव्यमेकहायनीशब्दः[1],न गुणसहितमिति। तयोः सम्बन्धस्य वाचिकां षष्ठीमन्तरेण कथं सम्बन्धो गम्यते[2]? आह—अन्तरेणापि षष्ठीम् एकविभक्तिनिर्देशात् सामानाधिकरण्यमवगमिष्यामः। यथा—नीलमुत्पलमिति। तदनुपपन्नम्[3]। रूपादरुणाशब्दस्य गुणवचनता। कल्पनीयन्त्वेकविभक्तिसंयोगादेकहायनीशब्दसन्निधानाच्च तदेकवाक्यतामभ्युप-

---

अरुणा को जानना चाहिये। और यदि [अरुणा शब्द] गुणवचन है, तो 'क्रीणाति' के साथ सबद्ध नहीं होता है। इसलिये वाक्यभेद करके सम्पूर्ण प्रकरण में ही [अरुणा का] संनिवेश होता है।

विवरण—स्त्रियां यत् प्रातिपदिकं वर्तते—द्र० महाभाष्य ४।१।३—"नैवं विज्ञायते स्त्रियामभिधेयायामिति, नापि स्त्रीसमानाधिकरणादिति। कथं तर्हि? स्त्रियां यत्प्रातिपदिकं वर्तते, तस्माट्टाबादयो भवन्ति। कस्मिन्नर्थे? स्वार्थे।" भवति गुणवचनस्यापि स्त्रीलिङ्गता—वैयाकरण गुणवचन शब्दों से मतुप् प्रत्यय करके उसके लुक् का विधान करते हैं। इस प्रकार उनके मत में लिङ्गवचन की सिद्धि होती है। (द्र०—महाभाष्य ५।२।९४—गुणवचनेभ्यो मतुपो लुक्, तथा च लिङ्गवचन-सिद्धिः वार्तिक और इनका भाष्य)।

व्याख्या—(आक्षेप) और यदि 'क्रीणाति' के साथ सम्बद्ध नहीं होता है, तो उसी वाक्य में 'एकहायनी' शब्द के साथ सम्बद्ध हो जायेगा। इससे वाक्यभेद नहीं होगा। (समाधान) यह ठीक नहीं है। अरुणा शब्द केवल गुण को ही कहता है, द्रव्य और गुण को नहीं कहता। और एकहायनी शब्द केवल द्रव्य को कहता है, गुणसहित द्रव्य को नहीं कहता। अतः उन दोनों (= अरुण गुण और एकहायनी द्रव्य) के सम्बन्ध की वाचक षष्ठी के विना कैसे संबद्ध जाना जायगा? (आक्षेप) इस विषय में कहते हैं—षष्ठी विभक्ति के विना भी [अरुणा और एकहायनी में] एक विभक्ति (=समान विभक्ति) के निर्देश से [दोनों का] सामानाधिकरण्य जान लेंगे। जैसे—नीलमुत्पलम् (=नील कमल) [में नील गुण और उत्पल द्रव्य का सामानाधिकरण्य से विना षष्ठी के भी सम्बन्ध जाना जाता है]। (समाधान) यह उपपन्न नहीं होता है। अरुणा शब्द के रूप (=शब्दसामर्थ्य) से गुणवचनता जानी जाती है। एक विभक्ति (=समान विभक्ति के) संयोग से और एकहायनी शब्द की समीपता से उनकी एकवाक्यता स्वीकार करके एकहायनी शब्द

---

१. 'अभिदधाति' इति शेषः। २. 'गम्येत' इति युक्तः पाठः स्यात्।
३. काशी-संस्करणे 'तदुपपन्नम्' इत्यपपाठः।

गम्य एकहायनीशब्दसामानाधिकरण्यम् । न च लिङ्गाद्वाक्यं बलीयः । तस्मादसदेतत् ।

तत्रोच्यते यदा केवलगुणवचनतायां शब्दः प्रवर्त्तमानो नान्येन सम्बन्धं लभते, तदाऽनुपदेशकत्वाद्[1] आनर्थक्यं मा भूदिति, द्रव्यपरतामापद्यते । तस्यामवस्थायामेक-विभक्तियुक्तेन एकहायनीशब्देन सन्निहितेनैकवाक्यतामापद्यमानः समानाधिकरणो भवति । तथा च कृत्वा 'नीलमुत्पलम्' इत्युपपद्यते । स चायमरुणाशब्दस्तस्यामवस्थायां वर्त्तते । न हि अस्य स्वार्थमभिदधत इतो विच्छिन्नस्य प्रकरणेऽप्यर्थवत्ता । कुतः ? येनैव हेतुना क्रीणातिना न सम्बद्ध्यते—'नामूर्त्तोऽर्थः क्रियायाः साधनं भवतीति' । न च क्रिया-साधनैर्द्रव्यैः—'न हि केवल गुणवचनः शक्नोति द्रव्यमभिधातुमिति' । स एव हेतुः प्रकरण-सम्बन्धाभावेऽपि । तत्रापि सम्बध्यमानः क्रियाभिर्वा सम्बद्ध्येत, तत्साधनैर्वा द्रव्यैः ।

के साथ सामानाधिकरण्य कल्पनीय (=कल्पना योग्य) होता है । लिङ्ग (=शब्दसामर्थ्य) से वाक्य बलवान् नहीं होता है । इसलिये यह (=उक्त समाधान) असत् (=अयुक्त) है ।

विवरण—न च लिङ्गाद् वाक्यं बलीयः—यह विचार आगे मी० ३।३।१४ श्रुति-लिङ्ग-वाक्य......पारदौर्बल्यमर्थविप्रकर्षात् सूत्र में किया है । लिङ्ग का अभिप्राय ३।३।१४ के भाष्य में इस प्रकार दर्शाया है—"कथं खलु उपकरिष्यतीति? सन्दिह्यमाने भवति सामर्थ्यात् परिनिश्चयः-यत्रायं समर्थः तत्र शक्यो विनियोक्तुम्" (=यह कैसे उपकारक होगा? ऐसा सन्देह होने पर शब्द के सामर्थ्य से निश्चय होता है—जहां यह शब्द समर्थ है, वहां विनियोग किया है)। इस से लिङ्ग का अर्थ 'शब्दसामर्थ्य है' ।

व्याख्या—(आक्षेप) इस विषय में कहते हैं—जब केवल गुण को कहने में प्रवृत्त हुआ शब्द अन्य के साथ सम्बन्ध को प्राप्त नहीं करता, तब किसी अर्थ का कथन करनेवाला न होने से अनर्थकता न होवे, इस कारण वह द्रव्यपरता (=द्रव्यवाचकता) को प्राप्त होता है । उस अवस्था में (=द्रव्यपरक होने पर) समानविभक्ति से युक्त समीपस्थ एकहायनी शब्द के साथ एकवाक्यता को प्राप्त होकर समानाधिकरण होता है । इसी प्रकार 'नीलमुत्पलम्' यह प्रयोग उपपन्न होता है । और यह अरुणा शब्द उसी अवस्था में है । इसका स्वार्थ (=गुण) को कहते हुए इस वाक्य से विच्छिन्न हुए का प्रकरण में भी अर्थवत्ता नहीं है । किस हेतु से? जिस हेतु से [यह अरुणा शब्द] 'क्रीणाति' के साथ सम्बद्ध नहीं होता—'अमूर्त अर्थ क्रिया का साधन नहीं होता है'। और क्रिया के साधन द्रव्यों से भी सम्बद्ध नहीं होता है—'केवल गुणवचन द्रव्य को नहीं कह सकता है' । वही हेतु प्रकरण के सम्बन्ध के अभाव में भी जानना चाहिये । वहां (=प्रकरण में) भी सम्बद्ध होता हुआ क्रिया के साथ सम्बद्ध होगा, अथवा क्रिया के साधन द्रव्यों के साथ । और ये दोनों (=क्रिया के

---

१. कस्यचिदर्थस्यानुपदेशकत्वादिति भावः ।

तच्चोभयमप्यनुपपन्नम् । अतोऽनर्थकत्वपरिजिहीर्षया सन्निहितेनैकहायनीशब्देनारुणा-शब्दः सम्बद्ध्यते । नास्ति वाक्यभेदः । नैतदेवम् । न ह्ययमरुणाशब्द एकहायनीविशेषणं भवितुमर्हति । किं कारणम्? करणविभक्त्या तृतीयया समुच्चरितोऽयम् । तेनैतेन तृतीया-श्रुतिसामर्थ्यात् क्रियाविशेषणेन भवितव्यम् । कारकाणां हि क्रियया सम्बन्धो, न द्रव्य-णेति । स एष श्रुतिसामर्थ्यात् क्रियाविशेषणम्, 'वाक्यादेकहायनीविशेषणम् । श्रुतिश्च वाक्याद् बलीयसी । तस्मान्नास्यैकहायनीसम्बन्ध इति ।

ननु च गुणस्य क्रियासम्बन्धाभावादविवक्षिता कारकशक्तिरिति[2], एकहायनी-सम्बन्धोऽयमध्यवसितः । एवमपि नोपपद्यते । यदि कारकाभिधानमविवक्षितमिति, गुण-शब्देनैतेन द्रव्यमभिधातुमिष्यते, तदा प्रातिपदिकार्थस्याव्यतिरेक इति, प्रथमा विभ-क्तिः प्राप्नोति । न हि तृतीयान्तस्तमभिसम्बन्धं शक्नोति वक्तुम् । न चान्यथानुपपत्ति-रित्यन्योऽस्यानुपपद्यमानोऽर्थं शक्यते कल्पयितुम् । यथा अग्नौ तिष्ठति माणवकः इत्युक्ते ज्वलनेऽनुपपद्यमानो न अश्वे गवि वा कल्प्यते । अग्निसमीपवचन एवाध्यवसीयते । तद्व-

---

साथ सम्बन्ध और क्रिया-साधन के साथ सम्बन्ध) ही उपपन्न नहीं होते हैं । इसलिये अनर्थकत्व को हटाने की इच्छा से समीपस्थ एकहायनी शब्द के साथ अरुणा शब्द सम्बन्ध होता हैं । इस प्रकार वाक्यभेद नहीं होता है । (समाधान) ऐसा नहीं है ।यह अरुणा शब्द एकहायनी का विशे-षण नहीं हो सकता हैं । क्या कारण है ? करण की विभक्ति तृतीया के साथ यह (=अरुणा शब्द) उच्चरित हैं । इसलिये इस तृतीयाविभक्ति के श्रुतिसामर्थ्य से यह क्रियाविशेषण होना चाहिये । कारकों का क्रिया के साथ ही संबन्ध होता है,द्रव्य के साथ नहीं होता है। इसलिये यह(= अरुणा शब्द) श्रुतिसामर्थ्य हेतु होने से क्रियाविशेषण है, और वाक्य से एकहायनी का विशेषण होता है । श्रुति वाक्य से बलवान् होती है । इसलिये इस [अरुणा शब्द] का एकहायनी के साथ सम्बन्ध नहीं है ।

(आक्षेप) गुण का क्रिया के साथ संबन्ध न होने से कारकशक्ति अविवक्षित है, इसलिये यह एकहायनी सम्बन्ध स्वीकार किया है ।(समाधान) इस प्रकार भी उपपन्न नहीं होता है । यदि कारक को कहनारूप शक्ति अविवक्षित है, इसलिये इस [अरुणा] गुण शब्द से द्रव्य का कथन करना चाहते हो, तब प्रातिपदिक के अर्थ से भिन्न अर्थ नहीं होता हैं, इससे [अरुणया] में प्रथमा विभक्ति प्राप्त होती है । तृतीयान्त [अरुणया शब्द] उस (=प्रातिपदिकार्थ) सम्बन्ध को नहीं कह सकता । और किसी प्रकार से उपपत्ति नहीं होती है, इससे उपपन्न न होनेवाला अर्थ कल्पित नहीं किया जा सकता । जैसे अग्नौ तिष्ठति माणवकः ऐसा कहने पर अग्नि में ठहरना अर्थ के उपपद्यमान न होने पर 'अश्व पर' या 'गौ पर' अर्थ की कल्पना नहीं की जाती है । [अग्नि शब्द]

---

१. 'एकवाक्यत्वात्' इति पाठान्तरम् । काशीमुद्रिते 'क्रियाविशेषणमेकहायनीविशेषणम्' इत्यपपाठः ।

२. 'कारकविभक्तिरिति' इति पाठान्तरेऽपि स एवार्थः ।

दिहाप्यप्रथमान्तः शब्दो न कथञ्चिदप्यव्यतिरिक्ते प्रातिपदिकार्थे भवितुमर्हतीति। तस्मात् काममनर्थकोऽवगम्यताम्, नास्यैकहायनीसम्बन्धोऽध्यवसातव्यः।

आह—न ब्रूमः, न कारकमरुणाशब्देनाभिधीयते इति। व्यक्तमरुणगुणविशिष्टमेतेन कारकमभिधीयते। कदाचित्तु किञ्चित् विधित्सितं भवति, कदाचिदुपसर्जनीभूतोऽर्थो विधित्सितः, प्रधानीभूतोऽनुवादः। तद्यथा—दण्डीत्युपसर्जनीभूतदण्डकपुरुषप्रधानकः शब्दोऽवगम्यते। कदाचित्तु निर्ज्ञाते पुरुषे दण्डगुणविधानार्थमुच्चार्य्यते—दण्डी प्रैषानन्वाह[1] इति। यथा—लोहितोष्णीषा ऋत्विजः प्रचरन्ति[2], इति। एवमिहापि यद्यनुपसर्जनभूतोऽरुणो

अग्नि की समीपता को कहनेवाला ही जाना जाता है [अर्थात् 'अग्नि के समीप बैठा है' अर्थ जाना है]। उसी प्रकार यहां भी अप्रथमान्त [अरुणा] शब्द किसी प्रकार भी अभिन्न प्रातिपदिकार्थ में नहीं हो सकता है। इसलिये चाहे उसे अनर्थक जानो, परन्तु इसका एकहायनी के साथ सम्बन्ध नहीं जाना जा सकता है।

विवरण—कारकाणां क्रियया सम्बन्धः—कारक शब्द का अर्थ है- करोतीति कारकम्, जो क्रिया की निष्पत्ति करता है=क्रिया की निष्पत्ति में साधन होता है। प्रातिपदिकार्थाऽव्यतिरेक इति प्रथमा प्राप्नोति—जब प्रातिपदिक के साथ कर्मत्व वा करणत्व अर्थ सम्बद्ध नहीं होता है, प्रातिपदिक अपने ही अर्थ को कहता है, तब प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अष्टा० २।३।४६) के नियम से प्रथमा विभक्ति होती है। यदि अरुणया पद में करण कारक की शक्ति अविवक्षित है, तो वह प्रातिपदिकार्थ से भिन्न को कहनेवाला नहीं होता है। उस अवस्था में प्रथमा विभक्ति होनी चाहिये।

व्याख्या—(आक्षेप) हम यह नहीं कहते हैं कि कारक अरुणा शब्द से नहीं कहा जाता है। स्पष्ट ही इस [अरुणया शब्द] से अरुणगुण विशिष्ट कारक कहा जाता है। कभी कुछ विधान करने की इच्छावाला होता है और कभी उपसर्जनीभूत (=गौण अर्थ) विधान करने की इच्छावाला होता है. प्रधानीभूत (=प्रधान) अर्थ अनुवाद होता है। जैसे—'दण्डी' शब्द गुणभूत दण्डेवाला पुरुष की प्रधानतावाला जाना जाता है। और कभी पुरुष के ज्ञात होने पर दण्डगुण-विधान के लिये उच्चारण किया जाता है—दण्डी प्रैषानन्वाह (=दण्ड धारण किया हुआ मैत्रावरुण प्रैष देता है)। [यहां मैत्रावरुण ऋत्विक् विज्ञात है, प्रैष देना कर्म भी ज्ञात है। अतः दण्डी प्रैषानन्वाह में केवल दण्ड सम्बन्धमात्र विवक्षित है।] जैसे—लोहितोष्णीषा ऋत्विजः

---

१. अनुपलब्धमूलम्। दण्डी=मैत्रावरुणनामक ऋत्विग्विशेषः। [यजमानः] क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति। तै० सं० ६।१।४॥

२. यथाश्रुतमनुपलब्धमूलम्। द्र०—लोहितोष्णीषा लोहितवाससो निवीता ऋत्विजः प्रचरन्ति। षड्विंश ब्रा० ३।८; लोहितोष्णीषा लोहितवसना……। आप० श्रौत २२।४।२३॥

गुणः, प्रधानभूतं कारकम्। तथाप्यनूदिते कारकेऽरुणगुणविधानार्थं वचनं युज्यते। तस्माद् एकहायनीसम्बन्ध उपपद्यते। नास्ति वाक्यभेद इति।

नैतत्सारम्। अत्र हि एकहायनीक्रीणात्योरनवबुद्धं सम्बन्धं बोधयितुमयमेकहायनीशब्द उच्चरितः। स एष कथमिवारुणाशब्देन सम्बद्धयते? तदेतदभिहितमपि पुनः पुनः पर्य्यनुयुज्यते—कथं पुनरेकहायनीशब्दस्य क्रीणातिना अरुणगुणेन च समाने समभिव्याहारे क्रीणातिना सम्बन्धोऽभ्युपगमनीयः, न पुनरारुण्येनेति? शब्दप्रामाण्यात्। भवति हि क्रियासम्बन्धस्य वाचिका विभक्तिरेकहायनीशब्दमनुनिविष्टा। न तु गुण-

---

प्रचरन्ति (=लाल पगड़ी धारण किये हुए ऋत्विक् कर्म करते हैं)। [यहां भी यज्ञ के कर्त्ता ऋत्विक् और उनका कर्म करना विज्ञात है। अतः लोहितोष्णीषा ऋत्विजः प्रचरन्ति में ऋत्विजों का लाल पगड़ी धारण करना अर्थ ही कथनीय है।] इसी प्रकार यहां भी यद्यपि अरुण गुण उत्सर्जनीभूत (=गौण) है, और कारक प्रधान है। तथापि कारक के अनुवाद होने पर अरुण गुण के विधान के लिये [अरुणया एकहायन्या०] वचन युक्त है। इस हेतु से [अरुणा का] एकहायनी के साथ सम्बन्ध उपपन्न होता है। वाक्यभेद नहीं है।

विवरण—दण्डी प्रैषानन्वाह—सोमयाग में यजमान की दीक्षा के प्रकरण (द्र०—तै० सं० ६।१।३) में कृष्णाजिन वस्त्र और मेखला से दीक्षा का विधान किया है। सोमक्रय के पश्चात् यजमान दण्ड को मैत्रावरुण ऋत्विक् को दे देता है—क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति (तै० सं० ६.१.४)। यह दण्डधारण किया हुआ मैत्रावरुण अग्नीषोमीय पशुयाग में प्रेष देता है, और अनुवाक्या का पाठ करता है—मैत्रावरुणः प्रेष्यति चान्वाह च (द्र०—मी० भाष्य ३।७।४३, अधिकरण २२)। लोहितोष्णीषा ऋत्विजः प्रचरन्ति—यह विधि श्येनादि अभिचार कर्म में है। द्र०—षड्विंश ब्रा० ३।८—श्येनेनाभिचरन् यजेत ऐसा कथन करके कहा है—लोहितोष्णीषा लोहितवाससो निवीता ऋत्विजः प्रचरन्ति (=लाल पगड़ी धारण किये लाल, वस्त्र पहने हुए, और निवीत हुए=यज्ञोपवीत को दांये कन्धे पर धारण और बाएं हाथ के नीचे निकाले हुए ऋत्विक कर्म करते हैं। ऐसा ही उल्लेख आप० श्रौत २२।४।२३ में मिलता है।

व्याख्या—(समाधान) यह कथन सारयुक्त नहीं है। यहां [एकहायन्या क्रीणाति में] एकहायनी और क्रीणाति के न जाने हुआ सम्बन्ध को बताने के लिये एकहायनी शब्द उच्चरित हुआ है। वही (=एकहायनी शब्द, जो क्रीणाति के साथ सम्बन्ध के बोधन के लिये उच्चरित है) किस प्रकार अरुणा शब्द के साथ सम्बन्ध को प्राप्त होगा? (आक्षेप) यह [हमारे द्वारा] कही हुई बात पर भी बार-बार आक्षेप किया जाता है—क्यों एकहायनी शब्द का 'क्रीणाति' और 'अरुण' गुण के साथ समान कथन होने पर 'क्रीणाति' के साथ सम्बन्ध स्वीकार करना चाहिये, आरुण्य गुण के साथ क्यों नहीं करना चाहिये? (समाधान) शब्दप्रामाण्य से। क्रिया के सम्बन्ध को कहनेवाली विभक्ति एकहायनी शब्द में अनुनिविष्ट (=वर्तमान) है। गुण के सम्बन्ध को कहनेवाली विभक्ति

सम्बन्धस्य वाचिका। का पुनः क्रियासम्बन्धस्य वाचिका, का वा गुणसम्बन्धस्येति? कारकलक्षणा। क्रियासम्बन्धे विवक्षिते भवति द्वितीयादिः। अविवक्षिते पुनः कारके सम्बन्धमात्रविवक्षायां षष्ठी। न चात्र षष्ठीं पश्यामः, पश्यामस्तु खलु तृतीयाम्। अतः क्रीणातिना सम्बन्धमभ्युपगच्छाम एकहायनीशब्दस्य,नारुणाशब्देनेति। कथं तर्हि भवत्यत्र सम्बन्धः—नीलमुत्पलम् इति? उच्यते—भवति। न तु श्रुतिलक्षणः, किन्तु वाक्यलक्षणः। उत्पलशब्दसन्निधाने तदपेक्षो[1] नीलशब्दः प्रयुज्यमान[2]स्तेनैकवाक्यतामभ्युपगच्छन्न-जहत्स्वार्थवृत्ति[3]रुत्पलविशेषाभिधानपर उच्चार्य्यमाणः सम्बन्धमभ्युपैति।

नन्विहापि वाक्यलक्षणस्तद्वदेवारुणिम्ना समं सम्बन्धः, एकहायन्या युज्यते। नेति

नहीं है।(आक्षेप) क्रिया के सम्बन्ध को कहनेवाली कौनसी विभक्ति है,और कौनसी गुण के सम्बन्ध को कहनेवाली है? (समाधान) कारक जिस का लक्षण है [अर्थात् कारकत्व के कारण होनेवाली विभक्ति]। क्रिया के साथ सम्बन्ध के विवक्षित होने पर द्वितीया आदि विभक्ति होती है। और कारक की विवक्षा न होने पर सम्बन्धमात्र की विवक्षा में षष्ठी होती है। यहां (एकहायनी शब्द में) षष्ठी विभक्ति को हम उपलब्ध नहीं करते हैं, तृतीया को तो देखते हैं। इसलिये एकहायनी शब्द का क्रीणाति के साथ सम्बन्ध स्वीकार करते हैं, अरुणा शब्द के साथ सम्बन्ध नहीं मानते हैं। (आक्षेप) अच्छा तो यहां [नील और उत्पल का] कैसे सम्बन्ध होता है—नीलमुत्पलम्? [क्योंकि यहां भी सम्बन्ध की वाचिका षष्ठी विभक्ति नहीं है।] (समाधान) [षष्ठी विभक्ति न होने पर भी] सम्बन्ध होता है। [वह सम्बन्ध] श्रुतिलक्षण नहीं है, किन्तु वाक्यलक्षण है। उत्पल शब्द के समीप में उसकी अपेक्षा करनेवाला [प्रयुज्यमान] नील शब्द उसके साथ एक-वाक्यता को प्राप्त करता हुआ अजहत्स्वार्थवृत्ति (=जिसने अपने अर्थ को नहीं छोड़ा है ऐसा) उत्पल विशेष को कहनेवाला उच्चार्यमाण [उत्पल के साथ] सम्बन्ध को प्राप्त होता है।

विवरण—कारकलक्षणा—कारकं लक्षणं यस्याः=कारक जिस का लक्षण है,अर्थात् कर्मादि कारकत्व के कारण जो विभक्ति होती है। अविवक्षिते कारके—द्र०—षष्ठी शेषे पाणिनीय सूत्र (अष्टा० २।३।५०)। न तु श्रुतिलक्षणः—श्रुति=शब्द के श्रवण से लक्षित होनेवाला सम्बन्ध नहीं है। क्योंकि सम्बन्धविधायिका षष्ठी विभक्ति नहीं है। वाक्यलक्षणः—समभिहार लक्षण (=पदों के परस्पर मेल से लक्षित होनेवाला) सम्बन्ध है। अजहत्स्वार्थवृत्तिः—अपने अर्थ का कहना न छोड़नेवाला अर्थात् स्व=नीलगुण में वर्तमान नीलशब्द।

व्याख्या—(आक्षेप) यहां (=अरुणया एकहायन्या) में भी तो वाक्यलक्षण संबन्ध उस (=नीलोत्पलम्) के समान ही अरुणिमा के साथ एकसा है। अतः [अरुणिमा] एक-

---

१. 'तदपेक्षो' इत्यपपाठः। २. 'प्रयुज्यमानः' पदमत्र प्रमादान्नष्टम्।

३. गच्छन्नाजहत्स्वार्थवृत्ति० इत्यपपाठः।

ब्रूमः । श्रुतिर्हि वाक्याद् बलीयसी । श्रुतिश्चास्याः क्रियासम्बन्धमाह, न गुणसम्बन्धम् । यदि पुनः श्रुतिसामर्थ्यात् क्रियासम्बन्धोऽभ्युपगम्येत, एकवाक्यत्वादपि गुणसम्बन्धः । नैवं शक्यम् । यो ह्यन्येन सह सम्बन्धमुच्चार्य्यते, न तत्समीपगतोऽप्यन्यस्तेन सह सम्बन्धमर्हति[1] । यथा—भार्य्या राज्ञः, पुरुषो देवदत्तस्येति भार्य्याविशेषणार्थमुच्चार्य्यमाणो राजशब्दो न पुरुषेण सम्बध्यते।तद्वदिह क्रियाविशेषणार्थम् उच्चार्य्यमाण एकहायनीशब्दो नारुणाशब्देन सम्बन्धमर्हति ।

आह—सत्यमेवमेतत् । असत्यामाकाङ्क्षायामानन्तर्यमकारणम् । सर्वत्र तु बोधिते

हायनी के साथ सम्बद्ध होती है । (समाधान) नहीं हैं, ऐसा कहते हैं । श्रुति वाक्य से बलवती होती है । और श्रुति (=तृतीया विभक्ति) इसके क्रिया के साथ सम्बन्ध को कहती है, गुण-सम्बन्ध को नहीं कहती है । (आक्षेप) यदि पुनः श्रुतिसामर्थ्य से [अरुणा का] क्रिया के साथ संबन्ध स्वीकार भी किया जाये, तब भी एकवाक्यत्व से गुणसम्बन्ध भी स्वीकार करना होगा । (समाधान) ऐसा सम्बन्ध नहीं कर सकते । जो शब्द अन्य के साथ सम्बन्ध करने के लिये उच्चारण किया जाता है, उसके समीप में उच्चरित भी अन्य शब्द उसके साथ सम्बन्ध के योग्य नहीं होता है । यथा—भार्या राज्ञः, पुरुषो देवदत्तस्य, यहां भार्या के विशेषण के लिये उच्चार्यमाण राजा शब्द पुरुष के साथ संबद्ध नहीं होता है । उसी प्रकार यहां क्रियाविशेषण के लिये उच्चार्यमाण एकहायनी शब्द अरुणा शब्द के साथ सम्बन्ध के योग्य नहीं होता है ।

विवरण—समीपगतोऽन्यस्तेन सह सम्बद्धुमर्हति—पदों का परस्पर सम्बन्ध सामर्थ्य होने पर ही होता है । यदि परस्पर सम्बद्ध होने का सामर्थ्य नहीं है, तो आनन्तर्यमात्र से परस्पर सम्बद्ध नहीं होते हैं । वात्स्यायनभाष्य (न्याय १।२।९) में एक प्राचीन वचन इस प्रकार उद्धृत है—

यस्य येनार्थसम्बन्धो दूरस्थस्यपि तस्य सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ।। इति ।

अर्थात्—जिसका जिसके साथ सम्बन्ध है, वह उस दूरस्थ के के साथ भी है । अर्थ से असमर्थ शब्दों का आनन्तर्य (=अव्यवहित होना) सम्बन्ध में कारण नहीं होता है ।

महाभाष्यकार ने भी १।१।५८ के भाष्य में कहा है—"अनानुपूर्व्येणापि सन्निविष्टानां यथेष्टमभि सम्बन्धो भवति" अर्थात्—आगे-पीछे प्रयुक्त शब्दों का भी यथेष्ट सम्बन्ध होता है (आगे भाष्यकार द्वारा उद्धृत प्रयोग भी दर्शनार्ह है ।

व्याख्या—(आक्षेप) यह सत्य है । आकाङ्क्षा न होने पर आनन्तर्य (=समीपता) [सम्बन्ध में] कारण नहीं होता है । सर्वत्र पदार्थ के बोध हो जाने पर वाक्यार्थ उपपन्न होता है,

---

१. द्र०—यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य सः । अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ।। इति न्यायभाष्ये (१।२।९) वात्स्यायनेनोद्धृतवचनम् ।

पदार्थे वाक्यार्थं उपपद्यते, नान्यथा। सामान्यवृत्ति हि पदम्, विशेषवृत्ति वाक्यम्। सामान्येनाभिप्रवृत्तानां पदार्थानां यद्विशेषेऽवस्थानं स वाक्यार्थः। तदेतदुक्तम्—तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्[1] इति। तत्र प्रत्यक्षः[2] पदार्थः, वाक्यार्थः पुनरानुमानिकः। तदेतदवगम्यताम्—केवलस्वार्थवृत्ति पदमनुपदेशकम्। इति पदान्तरेण सन्निहितेनैकवाक्यत्वमभ्युपैति, नान्यथेति। तदिह यद्यप्येकहायनीशब्दः क्रीणातिना सम्बध्यमानः कृतार्थो न पदान्तरेण सम्बन्धमाकाङ्क्षति। अरुणाशब्दस्तु पदान्तरेण सम्बन्धमलभमानोऽनर्थकः। इत्येकहायनीशब्देनैकवाक्यतामभ्युपैति। ननूक्तम्—क्रियासम्बन्धार्थो नारुणासम्बन्धार्थ इति। आह—अरुणाशब्दस्यानर्थक्यपरिहारायोभयसम्बन्धार्थं इति वदामः। अन्यार्थमपि कृतमन्यार्थमपि शक्नोति कर्त्तुम्। तद् यथा—शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते उपस्पृश्यते च[3]। एवमिहापि क्रयसम्बन्धार्थमेक-

---

अन्यथा वाक्यार्थ उपपन्न नहीं होता है। पद सामान्यवृत्ति (=सामान्य अर्थ में वर्तमान) होता है, और वाक्य विशेषवृत्ति (=विशेष अर्थ में वर्तमान) होता है। सामान्यरूप से अभिप्रवृत्त पदार्थों का जो विशेष में स्थित होना है, वह वाक्यार्थ है। यह कहा भी है—तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् (मी० १।१।२५) [=अर्थात् स्वस्व अर्थों में वर्तमान पदों का क्रियार्थ पद के साथ समाम्नाय होता है, इस कारण क्रियावाचक पदसहित पदसमूह से वाक्यार्थ जाना जाता है, क्योंकि वाक्यार्थ पदार्थनिमित्तवाला होता है]। ऐसी अवस्था में पदार्थ प्रत्यक्ष होता है, और वाक्यार्थ आनुमानिक है (=अनुमान से जानने योग्य) होता है। इसे इस प्रकार जानें—केवल स्वार्थ में वर्तमान पद किसी अर्थ का बोधक नहीं होता है। इसलिये सन्निहित पदान्तर के साथ एकवाक्यत्व को प्राप्त होता है, अन्यथा नहीं होता है। इसलिये यहां यद्यपि एकहायनी शब्द 'क्रीणाति' के साथ संबद्ध होता हुआ कृतप्रयोजन होने से पदान्तर के साथ सम्बन्ध की आकाङ्क्षा नहीं करता है। परन्तु अरुणा शब्द तो पदान्तर से सम्बन्ध को प्राप्त न करता हुआ अनर्थक होता है। इस कारण एकहायनी शब्द के साथ एकवाक्यता को प्राप्त होता है। (समाधान) अभी तो कहा है—[एकहायनी शब्द] क्रिया के साथ सम्बन्ध के लिये [उच्चरित] है, अरुणा के साथ सम्बन्ध के लिये नहीं है। (आक्षेप) 'अरुणा' शब्द की अनर्थकता को हटाने के लिये दोनों के साथ सम्बन्ध के लिये [एकहायनी शब्द उच्चरित] है, ऐसा हम कहते हैं। अन्य प्रयोजन के लिये निष्पन्न पदार्थ अन्य प्रयोजन को भी सिद्ध कर सकता है—जैसे धान के लिये नालियां बनाई जाती हैं, उनसे पानी पिया जाता है, और उपस्पर्श (=स्नानादि) भी किया जाता है। इसी प्रकार यहां भी क्रय के सम्बन्ध के लिये एकहायनी शब्द उच्चारण किया हुआ अरुणा शब्द के साथ सम्बद्ध हो

---

१. मी० १।१।२५॥

२. 'प्रत्यक्षत:' इति पूनामुद्रिते पाठः। 'प्रत्यक्षादिभिः' इति काशीमुद्रिते पाठः।

३. 'अन्यार्थमपि कृतं⋯ उपस्पृश्यते च' पाठः १।१।२३ सूत्रस्थेन महाभाष्यपाठेन तुलनीयः।

हायनीशब्द उच्चार्य्यमाणोऽरुणाशब्देन सह सम्भन्त्स्यते, न किञ्चिद् दुष्यति । तस्मान्न वाक्यभेद इति। नैतदस्ति। यद्यप्ययमरुणाशब्दोऽनर्थको मा भूत्,इत्येकहायन्या सम्बद्धचेत, तथापि सर्वस्मिन् प्रकरणे निवेष्टुमर्हति । न चैनं 'सोमं क्रीणाति' इत्येष शब्दः शक्नोति विशेष्टुम् । न ह्ययं विशेषणत्वेनोच्चार्यते । किं तर्हि ? अपूर्वोऽयं विधीयते ।

नन्वपूर्वोऽपि विधीयमान एकहायनीशब्दवदितरेण सम्भन्त्स्यते । कथम् ? प्रयोजनाय ह्युच्चार्य्यमाणः शब्दो येनार्थः, तस्मै तावत् प्रयोजनायावकल्प्यते।संन्निहितश्च बुद्धौ भवति । तेन बुद्धौ सन्निहितेन शक्यते साकाङ्क्षः शब्दः सम्बन्धयितुमिति । नैतदेवम् । यो ह्यसम्बद्धचमानोऽनर्थको भवति, स सम्बद्धचते, नान्यः । कुतः एतत् ? सम्बध्यमाने हि सामान्यं विशेषे अवस्थाप्येत । तत्र वाक्येन श्रुतिः पीडिता स्यात् । न चायमसम्ब-

---

जायेगा, कुछ दूषित नहीं होता है । इसलिये वाक्यभेद नहीं है । (समाधान)ऐसा नहीं है । यद्यपि यह अरुणा शब्द अनर्थक न होवे, इसलिये एकहायनी शब्द के साथ सम्बद्ध होवे, तथापि [अरुणा शब्द प्रकरण-सामर्थ्य से] इस सारे प्रकरण में निविष्ट होने योग्य है । और इस[अरुणा शब्द को] सोमं क्रीणाति यह शब्द विशेषित नहीं कर सकता । क्योंकि यह (=सोमं क्रीणाति) विशेषण रूप से उच्चरित नहीं है [अर्थात् 'किस पीत वर्णवाले को खरीदता है सोम को' इस अर्थ का बोध कराने के लिये सोमं क्रीणाति उच्चरित नहीं हैं] । तो किसलिये है ?यह (=सोमं क्रीणाति) अपूर्व विधान है ।

विवरण—अन्यार्थमपि कृतमन्यार्थमपि—यही बात महाभाष्यकार ने कई स्थानों में कही है । यथा—अन्यार्थमपि प्रकृतमन्यार्थमपि भवति । तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते च शालयश्च भाव्यन्ते (द्र० —महा०१।१।२३)। महाभाष्यप्रदीपोद्योत के 'छाया' टीका के रचयिता वैद्यनाथ पायगुण्ड ने 'उपस्पृश्यते' का अर्थ आचमनादि किया है ।

व्याख्या—[सोमं क्रीणाति से सोमक्रय] अपूर्व विधीयमान होता हुआ भी जैसे एकहायनी शब्द के साथ सम्बद्ध होता है, उसी प्रकार इतर [अरुणा] के साथ भी सम्बद्ध हो जायेगा । कैसे ? प्रयोजन के लिये उच्चार्यमाण शब्द जिस से प्रयोजन होता है, उस प्रयोजन के लिये पहले समर्थ होता है । और वह [सोमक्रय] बुद्धि में सन्निहित होता है (=विद्यमान है) । उस बुद्धि में सन्निहित [सोमं क्रीणाति] के द्वारा साकाङ्क्ष शब्द सम्बद्ध किया जा सकता है । (समाधान) इस प्रकार नहीं होता हैं । जो उच्चार्यमाण शब्द अनर्थक होता है,वह सम्बद्ध होता है,अन्य नहीं होता है । यह कैसे ? संबद्ध होता हुआ सामान्य [अरुणा शब्द] विशेष (='क्रीणाति अर्थ) में अवस्थापित किया जाये । उस अवस्था में वाक्य (=अरुणया क्रीणाति) से श्रुति (=सामान्य 'अरुणा' श्रुति)पीड़ित होवे । और यह [अरुणया]'क्रीणाति' के साथ सम्बद्ध न होता हुआ अनर्थक

द्धयमानः क्रीणातिनाऽनर्थको भवति । प्रकरणगतै[1]रभिसम्भन्त्स्यते ।

नन्वेतदुक्तम्—'प्रकरणेऽप्यस्य सम्बन्धोऽनुपपन्नः' इति । नानुपपन्नः । एकस्मिन् वाक्येऽन्योऽर्थो विधीयमानो नान्येन सम्बध्यते । वचनव्यक्तिभेदात् । अन्या हि वचनव्यक्तिर्विधीयमानस्य, अन्या गुणेन सम्बद्धयमानस्य । अज्ञातवज्ज्ञाप्यते विधीयमानोऽर्थो ज्ञातवदनूद्यते गुणसम्बन्धार्थम् । न च सकृदुच्चार्य्यमाणो ज्ञातवदज्ञातवच्च भवितुमर्हति । एकहायनीशब्दः क्रये विधीयमानोऽज्ञातवत् स्यात् । अरुणाशब्देन सम्बध्यमानश्च ज्ञातवत् । वाक्यभेदे पुनर्न दोषो भवति । प्रकरणे तु वाक्यान्तरैः क्रियाद्रव्यान्तराणि च प्राप्तानि । तैरिदं वाक्यान्तरविहितं सम्बद्धयते । तत्रान्यस्मिन् विधीयते, अन्यस्मिन् वाक्येऽनूद्यते, इत्युपपन्नं भवति । तस्मात् संयोगतोऽविशेषात्, प्रकरणाविशेषाच्च सर्वस्मिन् प्रकरणे द्रव्येषु निवेश इति । एवं प्राप्ते ब्रूमः—

नहीं होता है । [सोमयाग] प्रकरणगत पदार्थों के साथ सम्बद्ध हो जायेगा [अर्थात् सोम प्रकरणगत सब पदार्थ अरुण गुणवाले होवें, ऐसा जाना जायेगा]।

(आक्षेप) यह जो कहा है–'प्रकरण में भी इसका सम्बन्ध उपपन्न नहीं होता है' । (समाधान) अनुपपन्न नहीं है । एकवाक्य में विधीयमान अन्य अर्थ अन्य के साथ सम्बद्ध नहीं होता है। वचनव्यक्ति(=वचन के स्वरूप)के भेद होने से।विधीयमान अर्थ की अन्य वचनव्यक्ति होती है और गुण के साथ सम्बद्ध होनेवाले की अन्य होती है । विधीयमान अर्थ अज्ञात के समान बोधित किया जाता है, और गुण के सम्बन्ध के लिये ज्ञात के समान अनूदित होता है । [अर्थात् क्रय के अज्ञात साधन के ज्ञापन के समय एकहायन्या सोमं क्रीणाति ऐसी वचनव्यक्ति होती है, और अरुण गुण के सम्बन्ध के लिये अनूद्यमान की 'एकहायनीमुद्दिश्य गुणो विधीयते' ऐसी वचनव्यक्ति होती है ।] एक बार उच्चरित अर्थ ज्ञात के समान और अज्ञात के समान [दोनों प्रकार का] नहीं हो सकता है । एकहायनी शब्द क्रय में विधीयमान अज्ञातवत् होना है [अर्थात् एकहायन्या सोमं क्रीणाति में सोमक्रय में अज्ञात साधन के रूप में एकहायनी सुना जाता है]। और अरुणा शब्द के साथ सम्बद्धयमान [एकहायनी शब्द] ज्ञातवत् होता है [क्योंकि किसी के साथ किसी का सम्बन्ध जोड़ने में जिसके साथ सम्बन्ध जोड़ा जाता है, वह ज्ञातवत् होता है । और जिस का सम्बन्ध जोड़ा जाता है, वह अज्ञातवत होता है=एकहायनीमुद्दिश्य अरुणासम्बन्धो विधीयते] । वाक्यभेद होने पर यह दोष नहीं होता हैं । प्रकरण में तो वाक्यान्तरों से क्रियासमर्थ द्रव्य विहित हैं । उन के साथ यह [अरुणया] वाक्यान्तरविहित [अरुणया रूप से] सम्बद्ध हो जाता है । उस अवस्था में अन्य वाक्य से विधान किया जाता है, और अन्य वाक्य से अनुवित होता हैं, अतः उपपन्न होता है । इसलिये संयोग के विशेष न होने से, और प्रकरण के विशेष न होने से सम्पूर्ण प्रकरण में [विहित] द्रव्यों में समवेत होता है । ऐसा प्राप्त होने पर कहते हैं—

---

१. 'प्रकरणगताभिरेकहायनीभि०' इति काशीमुद्रितेऽपपाठः । अत्र 'एकहायनीभिः' इति बहुवचनेन यद्यर्थो गृह्येत [यथा सप्तमी शौण्डैः (अष्टा० २।३।४०),तदा युक्ततामुपैति ।

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥१२॥ (उ०)

यत्रार्थैकत्वं श्रूयते द्रव्यगुणयोः, तत्र द्रव्यगुणावेकस्मिन् पदार्थे नियम्येयाताम्। कुतः ? ऐककर्म्यादेककार्य्यत्वात्। एकं हि कार्यं द्रव्यगुणयोः श्रूयते क्रयसम्बन्धः। कथमेतदवगम्यते ? एकवाक्यत्वात्। कथमेकवाक्यत्वम् ? अरुणया पिङ्गाक्ष्या एकहायन्येति अपर्यवसितोऽर्थः साकाङ्क्षत्वादभिधातृप्रतिपत्त्रोः। सोमं क्रीणातीति तु पर्यवस्यति। तयोरेवं नैरुत्सुक्यात्।

यद्येककार्य्यता, किमिति विकल्पो न भवति ? नैतदेवम्। एकार्थास्तु विकल्पेरन्[1] इति विकल्पधर्माणौ प्राप्नुतः, इत्यऽयुक्तोऽयं पर्य्यनुयोगः। कथम् ? पर्य्यनुयोगो नाम स

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥१२॥

सूत्रार्थः—जिस वाक्य में (द्रव्यगुणयोः) द्रव्य और गुण के (अर्थैकत्वे) एक प्रयोजनवाला होने पर (ऐककर्म्यात्) एक कर्म=क्रिया के साध्य होने से द्रव्य और गुण का परस्पर (नियमः) =अन्वय (स्यात्) होवे।

विशेष—अरुणया पिङ्गाक्ष्या एकहायिन्या सोमं क्रीणाति इस वाक्य में अरुण गुण और एकहायनी द्रव्य का एक प्रयोजन सोमक्रय है। ऐककर्म्यात्—एक कर्म (=क्रिया) जिस वाक्य में हो वह एक कर्म, उसका भाव ऐककर्म्य अर्थात् एक क्रियावाले वाक्यत्व के कारण (=वाक्यस्थ कारकों से एक क्रिया के साध्यत्व के कारण) द्रव्य और गुण में परस्पर अन्वयरूप नियम होता है। वाक्यभेद नहीं होता है।

व्याख्या—जहां द्रव्य और गुण के अर्थ (=प्रयोजन) का एकत्व सुना जाता है, वहां द्रव्य और गुण एक पदार्थ [क्रय] में नियमित होवें। किस हेतु से ? ऐककर्म्य होने से=एककार्यत्व होने से। द्रव्य और गुण का क्रय-सम्बन्धरूप एक ही कार्य सुना जाता है। यह कैसे जाना जाता है ? [अरुणया पिङ्गाक्ष्या एकहायिन्या सोमं क्रीणाति के] एकवाक्य होने से। यह एकवाक्य कैसे है ? अरुणया पिङ्गाक्ष्या एकहायन्या इतना कहने पर कहने और प्रतिपत्ता (=सुननेवालों के) साकाङ्क्ष होने से अर्थ अपूर्ण रहता है [अर्थात् अर्थ की पूर्णता नहीं जानी जाती है]। सोमं क्रीणाति कहने पर अर्थ पूर्ण हो जाता है। इस प्रकार (=सोमं क्रीणाति कहने पर) वक्ता और श्रोता के उत्सुकतारहित होने से।

(आक्षेप) यदि [अरुणया पिङ्गाक्ष्या एकहायन्या की] एककार्यता है, तो विकल्प क्यों नहीं होता है ? (समाधान) ऐसा यह नहीं है। एकार्थास्तु विकल्पेरन् (=एकप्रयोजनवाले विकल्प=पर्याय से होवें) से विकल्प-धर्मवाले प्राप्त होते हैं, यह पर्यनुयोग (=आक्षेप)

---

१. मी० १२।३।१०॥

भवति, यः स्वपक्षं साधयति, विपक्षस्य च प्रतीपमाचरति। न च विकल्पोऽस्मत्पक्षस्य प्रतीपमाचरति। क्रयेणारुणिमासम्बन्धः,इत्येष नः पक्षः। न च विकल्पः, नानाकार्यत्वात्। नन्विदानीमेवोक्तम्—एकं कार्य्यमिति, तच्चापि विरुद्धम्। एवं हि पूर्वमभिहितम्—अमूर्त्तत्वात् गुणो न क्रियया सम्बद्धयते इति। इदानीं विपरीतमभिधीयते—उभावपि द्रव्यगुणावेकार्थौ क्रयमभिनिर्वर्त्तयत इति। उच्यते—नैतद्विरुद्धम्। न च विकल्पः, एकं कार्य्यम्। सामर्थ्यभेदस्तु। साक्षाद् हि द्रव्यं क्रियां प्रत्युपकरोति, गुणस्तु विशिनष्टि[1] साधनम्। यद्येवं न तर्हि गुणः क्रियामभिनिर्वर्त्तयति, साधनस्यासौ विशेषक इति। नैतदेवम्। गुणस्य क्रियामभिनिर्वर्त्तयत एतदेव सामर्थ्यम्, यत् साधनं विशिष्यात्। आकाङ्क्षति च क्रिया साधनविशेषणम्। चिह्नभूतो हि गुणः साधनं लक्षयति। असति चिह्ने न लक्ष्येत—कतमत् साधनं क्रियाया इति? ततः क्रियां नाध्यवस्येम कर्त्तुमिति। भवति क्रियासाधनं गुणः। न चैवं सति विकल्पो भवति। यथाऽधिकरणस्य कर्त्रादीनां च। अधिकरणं हि कर्त्रादीनि धारयति। तान्यधार्यमाणनि न शक्नुवन्ति क्रियामभिनिर्वर्त्तयितुम्। तथा कर्त्ता करणादीनि समाधत्ते। तान्यसमाहितानि न शक्नुवन्ति,

---

अयुक्त है। कैसे? पर्यनुयोग वह होता है, जो स्वपक्ष को सिद्ध करता है, और विपक्ष के विरुद्ध आचरण(=विरोध)करता है। और विकल्प हमारे पक्ष का विरोध नहीं करता है। हमार पक्ष यह है कि क्रय के साथ अरुणिमा (=अरुण गुण) का सम्बन्ध है। यहां विकल्प नहीं है, नाना (=अनेक) कार्य होने से। (आक्षेप) अभी ही तो कहा है—एक कार्य है, और वह भी विरुद्ध है। पूर्व ऐसा कहा था—अमूर्त होने से गुण क्रिया के साथ सम्बद्ध नहीं होता है। इस समय विपरीत कहते हो—दोनों(=द्रव्य और गुण) एक प्रयोजनवाले=क्रय को सिद्ध करते हैं। (समाधान) यह विरुद्ध नहीं है। और विकल्प भी नहीं है, एक कार्य है। सामर्थ्य का भेद तो है। द्रव्य साक्षात् क्रिया का प्रत्युपकार करता है (=साधन बनता है),गुण साधन को विशेषित करता है। (आक्षेप) यदि ऐसा है, तो गुण क्रिया को सिद्ध नहीं करता है, [क्रिया के] साधन का वह विशेषक होता है। (समाधान)ऐसा नहीं है,क्रिया को सिद्ध करते हुए गुण का यही सामर्थ्य है,कि वह[क्रिया के]साधन को विशेषित करे। क्रिया साधन के विशेषणों की आकाङ्क्षा करती है। चिह्नरूप(=चिह्न बनकर) गुण साधन को लक्षित करता है। चिह्न न होवे तो वह साधन को लक्षित न कर सके—कौनसा साधन है क्रिया का? इससे क्रिया को करने के लिये हम निश्चय न कर सकें [अर्थात् किस विशिष्ट साधन से हम अमुक क्रिया करें, इसे निश्चय नहीं कर सकते]। इस प्रकार गुण क्रिया का साधन होता है। इस प्रकार होने पर विकल्प नहीं होता है। जैसे [क्रिया के अधिकरणादि अनेक साधन होने पर भी] अधिकरण का और कर्त्ता आदि का [विकल्प नहीं होता है]। अधिकरण कर्त्ता आदि कारकों को धारण करता है। वे(=कर्त्ता आदि कारक) धारण न किये जाते हुए क्रिया को सिद्ध करने में समर्थ नहीं होते हैं। इसी प्रकार कर्ता करण आदि को धारण करता है।

---

१. काशीमुद्रिते 'विशिष्टानां साधनम्' इत्यपपाठः।

स्व स्वमर्थमभिनिर्वर्त्तयितुम् । यस्मिंस्तु साधनोपकारे कार्य्ये तस्मिन्नेवोपकारेऽन्यत् साधनं विधीयते, तत्र विकल्पः । यथा व्रीहिभिर्यजेत, यवैर्यजेत[1] इति । उभयेऽपि यागनिर्वृत्त्यर्थाः[2] ।

एवं तर्हि तदेवेदं सञ्जातम्—भवत्येकहायनीविधानम्, तद्विशेषणञ्चारुणो गुणः । तत्र स एव दोषो—'वाक्यभेदः प्रसज्ज्येतेति' । न ब्रूमोऽरुणाशब्द एकहायनीशब्देन सम्बद्धचते इति । किं तर्हि ? क्रीणातिनैव सम्बद्धचते । एवं हि श्रूयते—'अरुणगुणेन क्रयमभिनिर्वर्त्तयेदिति' । यथा च तेन निर्वर्त्त्यते, तथा यतितव्यं भवति । न चाविशिंषन् साधन गुणः क्रियामभिनिर्वर्त्तयति । अर्थात् साधनविशेषणतां प्रतिपद्यते । यथा स्थाल्यां पचेत् इति क्रियासाधनत्वेन निर्दिष्टेऽर्थात् सम्भवने धारणे च स्थालीं व्यापारयति । तद्वदिहापि द्रष्टव्यम् । तस्मान्नास्ति वाक्यभेदप्रसङ्ग इति ।

नन्वेमपि वाक्यं भिद्येत । कथम् ? प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टा[3] इति । यथा—

वे (=करणादि) धारण न किये हुए अपने-अपने प्रयोजन को सिद्ध करने में असमर्थ होते हैं । जिस साधन से सिद्ध उपकारवाले कार्य में उसी उपकार में अन्य साधन का विधान किया जाता है, वहाँ विकल्प होता है । यथा— व्रीहिभिर्यजेत, यवैर्यजेत । दोनों ही याग की निर्वृत्ति के लिये हैं ।

(आक्षेप) अच्छा तो यह वही बात हो गई—एकहायनी का [क्रय में] विधान होता हैं, और अरुण गुण उस (=एकहायनी) का विशेषण है । वहाँ वही दोष होता है—'वाक्यभेद प्राप्त होवे ।' (समाधान) हम यह नहीं कहते कि अरुणा शब्द एकहायनी के साथ सम्बद्ध होता है । तो क्या कहते हो ? [अरुणा शब्द] 'क्रीणाति' के साथ ही सम्बद्ध होता है । इस प्रकार सुना जाता है—'अरुण गुण से क्रय को सिद्ध करे ।' [ऐसा श्रवण होने पर] जिस प्रकार से उस (=अरुण गुण) से [क्रय] सिद्ध होता है, उस प्रकार यत्न करना होता है । साधन को विशेषित न करता हुआ गुण क्रिया को सिद्ध नहीं करता । अतः अर्थापत्ति [गुण] साधन की विशेषणता को प्राप्त हो जाता है । जैसे—स्थाल्यां पचेत् इस प्रकार [स्थाली के] क्रिया के साधनरूप से निर्देश होने पर अर्थापत्ति से [पाचक] सम्भवन और धारण कार्य में स्थाली को व्यापृत करता है (=व्यवहार में लाता है) । उसी प्रकार यहाँ भी जानना चाहिये । इसलिये वाक्यभेद का प्रसङ्ग नहीं है ।

(आक्षेप) इस प्रकार भी वाक्यभेद होता है । कैसे ? 'प्रत्येक के प्रति वाक्य की परि-

---

१. अनुपलब्धमूले वचने । अनयोर्विकल्पे विविधाः पक्षा आप० श्रौतसूत्रे (६।३१।१३-१४) द्रष्टव्याः ।

२. तण्डुलनिर्वृत्त्यर्थाः इति सार्वत्रिकोऽपपाठः । तच्चैतत् प्रकरणनैव सुस्पष्टम् ।

३. द्र०—महाभाष्य १।१।१,७ तथा अन्यत्र ।

देवदत्त-यज्ञदत्त-विष्णुमित्रा भोज्यन्तामिति प्रत्येकं भुजिः समाप्यते। यथा च—यस्य पिता पितामहः सोमं न पिबेद्[1] इति। एवमिहाप्यरुणया क्रीणाति, एकहायन्या क्रीणातीति। नैतदस्मत्पक्षस्य बाधकम्। एवमपि क्रये एवारुणिमा निवेक्ष्यति, न सर्वस्मिन् प्रकरणे इति। सत्यमेष दोषो न भवति। किन्त्वनरुणयाप्येकहायन्या क्रयः प्राप्नोति, अरुणया चानेकहायन्या। तत्र यदुक्तम्—द्रव्यगुणयोर्नियमः[2] इति, सा प्रतिज्ञा हीयते। न तर्हि ब्रूमो वाक्यभेद इति। कथम्? क्रयस्य हि द्रव्यारुणिमानावुपदिश्येते। न क्रयस्तयोः। न च प्रधानं प्रतिगुणं भिद्यते, प्रतिप्रधानं हि गुणो भिद्यते इति। अस्ति चायं दृष्टान्तः—समुदाये वाक्यपरिसमाप्तिः[3] इति। यथा—गर्गाः शतं दण्डयन्तामिति[3]। तथा अभिषुत्य हुत्वा भक्षयन्ति[4]

समाप्ति देखी जाती है'। जैसे—देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम् (=देवदत्त यज्ञदत्त विष्णुमित्र को खिलाओ) [कहने पर] प्रत्येक व्यक्ति के प्रति भुजि (=खिलाना) क्रिया समाप्त होती है। और जैसे—यस्य पिता पितामहः सोमं न पिबेत् (=जिसके पिता और पितामह ने सोम न पिया हो) [यहां 'न पिबेत्' का सम्बन्ध पिता और पितामह प्रत्येक के साथ होता है]। इसी प्रकार यहां भी अरुणया क्रीणाति, एकहायन्या क्रीणाति [प्रत्येक के साथ 'क्रीणाति' का सम्बन्ध होगा]। (समाधान) यह (=प्रत्येक वाक्यपरिसमाप्तिः) हमारे पक्ष में बाधक नहीं है। इस प्रकार (=प्रत्येक के साथ 'क्रीणाति' का सम्बन्ध होने पर) भी क्रय में ही अरुणिमा का निवेश होगा, सम्पूर्ण प्रकरण में नहीं होगा। (आक्षेप) सत्य है यह दोष नहीं होगा। किन्तु अरुणा एकहायनी से क्रय प्राप्त होगा, और अरुणा अनेकहायनी (=जो एक वर्ष की नहीं है) से भी। वहां आपने जो कहा है—'द्रव्य और गुण में नियम है' वह प्रतिज्ञा नष्ट होती है। (समाधान) अच्छा तो यह नहीं कहते हैं कि वाक्यभेद होता है। कैसे? क्रय के लिये ही द्रव्य (=एकहायनी) और अरुणिमा गुण का उपदेश किया है। उन (=द्रव्य और गुण) के लिये क्रय का विधान नहीं किया है [अर्थात् यहां क्रय का विधान होने से क्रय प्रधान है, और एकहायनी और अरुणा गौण हैं]। प्रति गुणभूत के लिये प्रधान का भेद (=प्रधान 'क्रीणाति' का आवर्त्तन) नहीं होता है, प्रति प्रधान के लिये गुण का भेद (=आवर्तन) होता है। और यह भी दृष्टान्त है—समुदाये वाक्य-परिसमाप्तिः (=वाक्य की समाप्ति समुदाय में होती है)। जैसे—गर्गाः शतं दण्डयन्ताम् (=गार्ग्य गोत्रवालों पर सौ रुपया दण्ड करो) [ऐसा आदेश होने पर प्रत्येक गार्ग्य पर १०० रु. दण्ड नहीं होता है, किन्तु समुदाय पर होता है]। और अभिषुत्य हुत्वा भक्षयन्ति (=सोम का

---

१. मै० सं० २।५।५; गो० ब्रा० २।१।१६॥

२. द्र०—महाभाष्य १।१।१,७ तथा अन्यत्र।

३. गर्गाः शतं दण्डयन्तामिति। अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति। महाभाष्य १।१।१,७ तथा अन्यत्र।

४. अनुपलब्धमूलम्।

इति । तस्मादुभयविशेषणविशिष्टः क्रयो विधीयते ।

कथं पुनस्तस्मिँश्चेतरस्मिँश्च दृष्टान्ते सति एकान्तेनावधार्य्यते—'समुदाय एव वाक्यपरिसमाप्तिः, न प्रत्यवयवमिति'[1] ? अत्र ब्रूमः—इह द्रव्यारुणिमानावुभावपि क्रियासम्बद्धावुपलभ्येते परस्परेणासम्बद्धौ । क्रयोऽपि द्रव्यारुणिमभ्यां विशिष्ट उपलभ्यते, नान्यतरेण । तत्र यदि द्रव्यपरमरुणिमपरं च भवति वचनमिदम्, ततः प्रत्यवयवम् असंशयं क्रयसम्बन्धः । अथ क्रयविधित्सयाऽभिधीयते, ततो यथैवायम् एकहायनीविशिष्टः, एवम् अरुणिमविशिष्ट इति । नियमत उभयसम्बन्धोऽभ्युपगमनीयः । न चात्र द्रव्यारुणिमानावीप्सितौ। ईप्सितस्तु क्रयः । तेन हि ज्योतिष्टोमद्रव्यं सोमः परिप्राप्यते । द्रव्यारुणिमानौ क्रयार्थौ । सन्तावीप्सितौ स्याताम्, नान्यथा । तस्मात् क्रयो विधीयते । स च नान्यतरविशिष्टः प्रतीयते इति । समुदाये वाक्यपरिसमाप्तिरिह निश्चीयते। यदा चैवम्, तदा नैक-

---

रस निकाल कर, उससे होम करके ऋत्विक् सोम का भक्षण करते हैं) [यहां भी ऋत्विक् समुदाय के साथ अभिषव होम और भक्षण क्रिया का सम्बन्ध होता है। एक-एक ऋत्विक् सोम निकाल कर होम करके भक्षण करे, यह संभव नहीं है]। इसलिये दोनों(=एकहायनी और अरुणा) विशेषण से विशिष्ट क्रय का विधान किया जाता है ।

(आक्षेप) उस (=प्रत्येकं वाक्यपरिसमाप्तिः), और इस (=समुदाये एव वाक्यपरिसमाप्तिः) दृष्टान्त के होने पर एक ही दृष्टान्त से निश्चय कैसे किया जाता है—'समुदाय में ही वाक्य परिसमाप्ति होती हैं, प्रत्यवयव नहीं होती है' ? (समाधान) इस विषय में कहते हैं—यहां द्रव्य (=एकहायनी) और अरुणिमा [गुण] दोनों ही एक-दूसरे से असम्बद्ध क्रिया के साथ संबद्ध उपलब्ध होते हैं । और क्रय भी द्रव्य और अरुणिमा दोनों से विशिष्ट उपलब्ध होता है, किसी एक से विशिष्ट उपलब्ध नहीं होता है । ऐसी अवस्था में यदि द्रव्यपरक और अरुणिमपरक [अर्थात् द्रव्य और अरुणिमा के विधान के लिये] यह (=अरुणया एकहायन्या) वचन होता है,तो निस्सन्देह प्रत्यवयव क्रय का सम्बन्ध होगा । और यदि क्रय के विधान की इच्छा से [यह वचन] कहा जाता है, तो जैसे यह (=क्रय) एकहायनी से विशिष्ट है,वैसे ही अरुणिमा से भी विशिष्ट है । इस कारण नियमतः दोनों का सम्बन्ध स्वीकरणीय होगा । यहाँ (अरुणया एकहायन्या क्रीणाति वाक्य में) द्रव्य और अरुणिमा ईप्सित (=इष्ट) नहीं हैं । ईप्सित तो क्रय है । उसी (=क्रय) से ही ज्योतिष्टोमयाग का द्रव्य सोम प्राप्त होता है । द्रव्य (=एकहायनी)और अरुणिमा गुण क्रय के लिये होते हुए ईप्सित हो सकते हैं,अन्यथा नहीं । इसलिये [उक्त वाक्य में क्रय का ही विधान है । वह अन्यतर विशिष्ट (=अन्य किसी विशेषण से विशिष्ट) प्रतीत नहीं होता है।इस कारण यहां समुदाय(=एकहायनी और अरुणा)में वाक्य की परिसमाप्ति निश्चित होती है । जब ऐसा (=समुदाय में वाक्यपरिसमाप्ति) है, तो एकहायनी को छोड़कर

---

१. तुलना कार्या—महाभाष्य १।१।७॥

हायनीं मुक्त्वाऽन्यद् द्रव्यं क्रयसाधनमस्ति । न च अरुणादन्यः साधनस्य विशेषको गुणः । इति नियमः सिद्धो भवति ।

अत्र वदामः—यदि क्रयस्य साधने गुणोऽभिसम्बन्धमुपैति, तदा वाक्ये भिन्नेऽपि क्रय-साधनत्वादरुणिमाऽन्यस्मिन् द्रव्ये न निवेक्ष्यते । किमर्थमेकवाक्यता प्रयत्नेन साध्यते इति? तदेतदभिधीयते—भिन्ने हि वाक्ये एकहायनीसाधनकः क्रयोऽवबुद्धो भवति । अरुणा-साधनमपि क्रयान्तरम्[1] । न तस्मिन्नेवैकहायनीसाधने क्रये अरुणिमा विहितो भवति । तत्र यत् क्रयान्तरमरुणगुणविशिष्टं तत्रार्थात् प्राप्तमन्यदपि साधनं भवति । तदपि विशिषन्नरुणो गुणस्तेन सम्बध्येत । एकवाक्यत्वे तु तत् परिहृतं भवति । तस्मात् साधु अभिधीयते—**अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्याद्** इति ॥१२॥ **इत्यारुण्यादिगुणानाम-संकीर्णताऽधिकरणम् ॥६॥**

अन्य द्रव्य क्रय का साधन नहीं है । और ना ही अरुण गुण से भिन्न साधन (=एकहायनी) का विशेषक है । इस प्रकार नियम सिद्ध होता है ।

(आक्षेप) इस विषय में कहते हैं—यदि क्रय के साधन में गुण सम्बन्ध को प्राप्त होता है, तब वाक्य के भिन्न (अरुणया क्रीणाति और एकहायन्या क्रीणाति दो वाक्य) होने पर भी क्रय का साधन होने से अरुणिमा अन्य [एकहायनी] द्रव्य में निविष्ट (=संबद्ध) नहीं होगी । तो एकवाक्यता प्रयत्नपूर्वक क्यों सिद्ध की जाती है ? (समाधान) इसलिये कहते हैं—भिन्न वाक्य होने पर [एकहायन्या क्रीणाति से] एकहायनी साधनवाला क्रय द्रव्य जाना जाता है । अरुणा भी क्रय का अन्य साधन जाना जाता है। उस एकहायनी साधनवाले क्रय में ही अरुणिमा विहित नहीं होती है । इस अवस्था से क्रय का अरुणगुणविशिष्ट अन्य साधन भी अर्थतः प्राप्त होता है [अर्थात् अकेला गुण क्रय का साधन नहीं बन सकता है, इसलिये अरुणगुणविशिष्ट किसी द्रव्य को वह आक्षिप्त करेगा । वह एकहायनी द्रव्य से भिन्न भी हो सकता है]। उस साधन को विशेषित करता हुआ भी अरुण गुण उस (=क्रय) के साथ सम्बद्ध हो सकता है । एकवाक्य मानने पर वह (=द्रव्यान्तर) परिहृत होता है [अर्थात् अन्य द्रव्य की उपस्थिति नहीं होती है] । इसलिये [सूत्रकार ने] ठीक ही कहा है—अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् (=द्रव्य और गुण का एक क्रय प्रयोजन होने से एक कर्मवाला वाक्य होने से द्रव्य और गुण का नियम होगा) ॥१२॥

---

१. अवबुद्धं भवतीति शेषः ।

सर्वेषां ग्रहादीनां सम्मार्गाद्यधिकरणम् ॥७॥

अस्ति ज्योतिष्टोमः—य एवं विद्वान् सोमेन यजते[1] इति । तत्र श्रूयते—दशापवित्रेण ग्रहं सम्मार्ष्टि[2] इति । तथा अग्निहोत्रे श्रूयते—अग्नेस्तृणान्यपचिनोति[3] इति । तथा दर्शपूर्णमासयोः श्रूयते—पुरोडाशं पर्यग्निकरोति[4] इति । तत्र सन्देहः—किमेकस्य ग्रहस्य, एकस्य अग्नेः, एकस्य पुरोडाशस्य च सम्मार्जनादि कर्त्तव्यम्, उत सर्वेषां ग्रहाणां, सर्वेषामग्नीनां, सर्वेषां पुरोडाशानामिति ? किं प्राप्तम् ? एको ग्रहः, एकोऽग्निः, एकः पुरोडाश इह ग्रहीतव्यः । कुतः ?

व्याख्या—ज्योतिष्टोम याग कहा है—य एवं विद्वान् सोमेन यजते (=जो विद्वान् इस प्रकार से सोम से यजन करता है)। उस सोमयाग में सुना जाता है—दशापवित्रेण ग्रहं सम्मार्ष्टि (=दशापवित्र=सोम को छाननेवाले वस्त्र के छोर से ग्रह को साफ करता है)। इसी प्रकार अग्निहोत्र में सुना जाता है—अग्नेस्तृणान्यपचिनोति (=अग्नि=अग्निस्थण्डिल पर रखे तृणों को हटाता है)। वैसे ही दर्शपूर्णमास में सुना जाता है—पुरोडाशं पर्यग्निकरोति (=पुरोडाश के चारों ओर जलता हुआ अंगारा वा जलते हुए कुशतृणों को घुमाता है)। इसमें सन्देह है कि क्या एक ग्रह का, एक अग्नि का, और एक पुरोडाश का सम्मार्जन आदि करना चाहिये, अथवा सब ग्रहों का, सब अग्नियों का, और सब पुरोडाशों का ? यहां क्या प्राप्त होता है ? एक ग्रह, एक अग्नि, और एक पुरोडाश का यहां ग्रहण करना चाहिये । किस हेतु से ?

विवरण—दशापवित्रेण—दशा शब्द का अर्थ है—वस्त्र का अन्तिम छोर, जिसके लम्बे धागे बुनाई से रहित होते हैं। जैसे कम्बल शाल और अंगोछे आदि में दोनों ओर का भाग होता है। दशापवित्र में समास है—पवित्रस्य दशा=दशापवित्रम् । जैसे दन्तानां राजा=राजदन्तः । यहां राजदन्तादिषु परम् (अष्टा० २।२।३१) से दशा शब्द का पूर्वप्रयोग जानना चाहिये । पवित्र से अभिप्राय है—ऊन का बना हुआ सोमरस छानने का वस्त्र । वाक्य का भाव है—सोमरस जिस पात्र में छाना जाता है, उसके ऊपर पवित्रसंज्ञक ऊर्णा वस्त्र होता है । छने हुए रस में से जब ग्रह में रस भरा जाता है, तो ग्रह के बाहर जो सोमरस लिप्त हुआ है, उसे पवित्र की दशा=छोर से पोंछे । अग्नेस्तृणान्यपचिनोति—अग्नियों के उपस्थान के पश्चात् कुण्ड के ऊपर रखे तृणों को हटाता है (द्र०—आप० श्रौत ६।२२।२ धूर्तस्वामी भाष्य, रुद्रदत्तवृत्ति)। पुरोडाशं पर्यग्निकरोति—पर्यग्निकरण का अर्थ आप० श्रौत १।२५।८ की वृत्ति में रुद्रदत्त ने परित उल्मुकनयनं पर्यग्नि-

---

१. तै० सं० ३।२।२॥ २. अनुपलब्धमूलम् । द्र०—दशापवित्रेण परिमृज्य परिमृज्य··· ग्रहासादनम् । कात्या० श्रौत० ९।५।२३॥ ३. आप० श्रौत ६।२३।२॥

४. अनुपलब्धमूलम् । द्र०—पर्यग्निकरोति । तै० ब्रा० २।१।३; पर्यग्निकरोति······ सहाज्यम् । कात्या० श्रौत २।५।२२॥

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥१३॥ (पू०)

श्रुतिसंयोगात् । एकत्वश्रुतिसंयुक्ता एते पदार्थाः । एकं हि द्रव्यमेषु श्रूयते । शब्दलक्षणे च हि कर्म्मणि यच्छब्द आह, तदस्माकं प्रमाणम् । यथा पशुमालभेत[1] इत्युक्ते एक एव पशुः पुमाश्चाँलभ्यते । एवमत्राप्येको ग्रहः सम्माज्र्जनीयः, एकस्य अग्नेस्तृणान्यपचेयानि, एकः पुरोडाशः पर्य्यग्निकर्त्तव्यः इति १३ ॥

सर्वेषां वा लक्षणत्वाद् अविशिष्टं हि लक्षणम् ॥१४॥ (उ०)

नैतदस्ति, ग्रहादिष्वेकत्वयुक्तेष्वमी पदार्थाः कर्त्तव्या इति । सर्वे ग्रहाः समार्ष्टव्याः;

करणम् (=पुरोडाश के चारों ओर अंगारे को घुमाना पर्यग्निकरण) कहाता है । तै०ब्रा० २।१।३।४ के भाष्य में सायण ने लिखा है — ज्वलतस्तृणस्य परितः प्रदर्शनं पर्यग्निकरणम् (=जलते हुए तिनके को चारों ओर दिखाना=घुमाना पर्यग्निकरण है) । पूर्व पृष्ठ ३८२ भी द्रष्टव्य है ।

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥१३॥

सूत्रार्थः—[दशापवित्रेण ग्रहं सम्मार्ष्टि आदि] (एकत्वयुक्तम्) एकवचन से युक्त कर्म (एकस्य) एक ग्रह एक अग्नि और एक पुरोडाश का करना चाहिये । (श्रुतिसंयोगात्) एकवचन श्रुति से इन द्रव्यों का संयोग होने से ।

व्याख्या—[एकवचन] श्रुति का संयोग होने से । ये [ग्रहादि] पदार्थ एकत्व को कहनेवाली श्रुति से संयुक्त हैं । एक द्रव्य ही इन (=ग्रहं सम्मार्ष्टि आदि) में सुना जाता है । शब्द जिसका लक्षण है अर्थात् शब्द से लक्षित होनेवाले कर्म में जो शब्द कहता है, वह हमें प्रमाण है । जैसे—पशुमालभेत ऐसा कहने पर एक ही पशु और वह भी नर पशु आलभन को प्राप्त होता है। इसी प्रकार यहां भी एक ग्रह शोधनीय है,एक अग्नि के तिनके उठाने चाहियें,और एक पुरोडाश का पर्यग्निकरण करना चाहिये ॥१३॥

सर्वेषां वा लक्षणत्वाद् अविशिष्टं हि लक्षणम् ॥१४॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्वपक्ष की व्यावृत्ति के लिये है । अर्थात् एक ग्रह, एक अग्नि, और एक पुरोडाश का संमार्गादि संस्कार नहीं करना चाहिये । किन्तु (सर्वेषाम्) सब ग्रहों, सब अग्नियों, और सब पुरोडाशों के समार्गादि संस्कार करने चाहियें । (लक्षणत्वात्) ग्रहत्व अग्नित्व पुरोडाशत्वादि जातिलक्षण से सब के युक्त होने से (लक्षणम्) ग्रहत्व अग्नित्व और पुरोडाशत्वादि जातिरूप लक्षण (हि) निश्चय से सब में (अविशिष्टम्) सामान्य हैं ।

व्याख्या—एकसंख्यायुक्त ग्रहादि में ये सम्मार्गादि पदार्थ करने चाहियें, यह नहीं है । सब ग्रहों का सम्मार्जन करना चाहिये, सब अग्नियों से तिनकों को हटाना चाहिये, पुरोडाशमात्र

---

१. द्र०—तै० ब्रा० १।५।६।७।

सर्वेभ्योऽग्निभ्यस्तृणान्यपचेयानि, पुरोडाशमात्रञ्च पर्य्यग्निकर्त्तव्यमिति । कुतः ? ग्रह-जात्या द्रव्यं लक्षयित्वा सम्मार्गादि विधीयते । अविशिष्टञ्च लक्षणं सर्वद्रव्येषु । तत्र न गम्यते विशेषः—को ग्रहः सम्मार्ष्टव्यः, को नेति ? सामान्यावगमाद् विशेषानवगमाच्च सर्वप्रत्ययः । तथाऽग्निपुरोडाशानामपि । नन्वेकवचनं श्रूयते, तद्विशेक्ष्यति । नैतदस्ति । एकत्वं हि श्रूयमाणं ग्रहादिष्वेकत्वं ब्रूयाद्,न द्वितीयादीन् प्रतिषेधेत् । एकत्वस्यासौ वाचकः, न द्वितीयादेः प्रतिषेधकः । तेनाप्रतिषिद्धे द्वितीयादौ सामान्यवचनेन प्राप्तं सम्मार्जनादि किमिति न क्रियेत ?

तत्रैतत् स्यात्—एकवचनमिह श्रूयमाणं प्राप्ते एवैकस्मिन् द्रव्ये, द्वितीयादिषु च, किमन्यत् कुर्य्यादन्यतः परिसंख्यायाः ? न चेदेकवचनं परिसञ्चक्षीत द्वितीयादीन्, अनर्थकमेव स्यात् । शक्नोति च द्वितीयादीन् निवर्त्तयितुम् । यथा—अश्वाभिधानीमादत्ते इति गर्द्दभाभिधानीं परिसञ्चष्टे । एवमत्रापि द्रष्टव्यमिति । नैतदेवम् । तत्र मन्त्रस्या-भिधान्याश्च यः सम्बन्धस्तदभिधानपरं वचनम्—इमामगृभ्णन् इत्यश्वाभिधानीम् इति । न

का पर्यग्निकरण करना चाहिये । किस हेतु से ? ग्रह जाति से द्रव्य को लक्षित करके सम्मार्ग आदि का विधान किया जाता है । और यह [ग्रहत्व अग्नित्व पुरोडाशत्व जातिरूप] लक्षण सब द्रव्यों में समान है । उनमें विशेष नहीं जाना जाता है कि—किस ग्रह का सम्मार्ग करना चाहिये, किस का नहीं करना चाहिये ? सामान्य की प्रतीति होने से और विशेष की प्रतीति न होने से सब का ज्ञान होता है । इसी प्रकार अग्नियों का और पुरोडाशों का भी । (आक्षेप) [ग्रहं सम्मार्ष्टि आदि] में एकवचन सुना जाता है, वह [ग्रहादि को] विशेषित करेगा । (समाधान) ऐसा नहीं है। निश्चय से ग्रहादि में श्रूयमाण एकत्व एकत्व को ही कहेगा,दूसरे तीसरे आदि का प्रति-षेध नहीं करेगा । यह [एकवचन] एकत्व का वाचक है, द्वितीय आदि का प्रतिषेधक नहीं है । इस कारण द्वितीयादि के प्रतिषेध न होने से सामान्यवचन से प्राप्त सम्मार्गादि [द्वितीय आदि में भी] क्यों न किया जाये ?

विवरण—ग्रहजात्या द्रव्यं लक्षयित्वा—पूर्व आकृत्यधिकरण(मी० १।३ । अधि० ११, सूत्र ३०-३५) में सिद्धान्त कर चुके हैं कि शब्द का वाच्य आकृति=जाति है ।

व्याख्या—(आक्षेप) वहां यह होवे—एक द्रव्य में और द्वितीयादि द्रव्यों में प्राप्त होने पर श्रूयमाण एकवचन यहां परिसंख्या(=वर्जन)के अतिरिक्त और क्या करेगा ? और यदि एक-वचन द्वितीय आदि का वर्जन न करे, तो अनर्थक ही होवे । और यह [एकवचन] द्वितीय आदि का निवर्तन कर सकता है । जैसे—अश्वाभिधानीमादत्ते (=अश्व की लगाम पकड़ता है) यह वचन गदहे की लगाम पकड़ने का प्रतिषेध करता है । इसी प्रकार यहां (=एकत्व के विषय में) भी जानना चाहिये । (समाधान) इस प्रकार (=अश्वाभिधानी के दृष्टान्त के अनुसार) यह नहीं है । वहां (=अश्वाभिधानी के आदान में) मन्त्र का और लगाम का जो [आदान] सम्बन्ध है, उसको कहनेवाला वचन है—'इमामगृभ्णन् इत्यश्वाभिधानीम्' ।'आदत्ते'(=

अनेन मन्त्रेण 'आदत्ते' इति लिङ्गेनैवाऽदाने प्राप्तत्वान्मन्त्रस्य परिसंख्या युक्ता। इह पुनर्यदेकवचनं द्रव्ये श्रूयते, तत् श्रूयमाणमप्यविधीयमानत्वेन न निवर्त्तकं भवितुमर्हति। यथा कश्चिदोदनं निर्दिश्य ब्रूयात्—य एनं भक्षयेत् कश्चित् श्वा मार्ज्जारो वा, स निवारयितव्य इति। तत्र यदि भक्षणं निमित्तत्वेन विधीयते, न श्वमार्ज्जारसम्बन्धः। ततः काकोऽप्यागच्छन् निवार्य्यते। श्रूयमाणेऽपि शुनि मार्ज्जारे वा, श्वमार्ज्जारसम्बन्धस्य निमित्तत्वेनाविधीयमानत्वात्। एवमिहाप्येकत्वसम्बन्धस्य अविधीयमानत्वाच्छ्रूयमाणेऽप्यकत्वे ग्रहमात्रं संमृज्येतेति।

न चात्र द्रव्यैकत्वसम्बन्धविधायकः कश्चिच्छब्दोऽस्ति। ननु सम्मार्ष्टीति। न ह्येतद् द्रव्यैकत्वसम्बन्धस्य विधायकम्। कस्य तर्हि? द्रव्यसंमार्गसम्बन्धस्य विधायकम्। एवं श्रुत्या स्वपदार्थो विहितो भवति। इतरथा वाक्येन परपदार्थो विधीयेत। श्रुत्यसम्भवे च वाक्यं क्रमते, न सम्भवन्त्यां श्रुतौ। अतोऽविधीयमानं विशेषणत्वेन एकत्वं, न द्वितीया-

---

ग्रहण करे) इस लिङ्ग से ही [लगाम का] आदान प्राप्त होने से मन्त्र की परिसंख्या 'इस [इमामगृभ्णन्] मन्त्र से लगाम नहीं पकड़े' युक्त है। और जो यहाँ [ग्रहं सम्मार्ष्टि आदि में] एकवचन [ग्रहादि] द्रव्य में सुना जाता है, वह श्रूयमाण होता हुआ भी विधीयमान न होने से [द्वितीय आदि का] निवर्तक नहीं हो सकता है। जैसे कोई व्यक्ति पके चावलों का निर्देश करके कहे—जो कोई कुत्ता वा बिल्ली इसे खावे,उसे हटा देना चाहिये। वहां (=ऐसा करने पर) यदि भक्षणकर्म [निवारण के] निमित्तरूप से विधान किया जाता है, कुत्ता और बिल्ली का संबन्ध निमित्तरूप से विधान नहीं किया जाता है। इससे कौवा भी खाने को आता हुआ हटाया जायेगा। कुत्ता वा बिल्ली के सुने जाने पर भी, कुत्ता और बिल्ली का [संबन्ध] निमित्तरूप से विधीयमान न होने से [काक आदि का भी निवारण होता है]। इसी प्रकार यहां भी एकत्वसंबन्ध के विधीयमान न होने से एकत्व के सुने जाने पर भी ग्रहमात्र का सम्मार्जन किया जाता है।

विवरण—अश्वामिधानीमादत्ते—यह विषय पूर्व मीमांसा १।२।३१ तथा ४२ में विचार कर चुके हैं। पाठक विगत-विचार को भी ध्यान में रखें।

व्याख्या—और भी, यहां द्रव्य और एकत्व के सम्बध का विधायक कोई शब्द नहीं है। (आक्षेप) [संबन्धविधायक] यह जो है—सम्मार्ष्टि शब्द। यह [सम्मार्ष्टि शब्द] द्रव्य और एकत्व के सम्बन्ध का विधायक नहीं है। तो किसका है? द्रव्य और सम्मार्ग के सम्बन्ध का विधायक है। ऐसा मानने पर श्रुति (=श्रवण) से स्वपदार्थ (=सम्मार्जन) विहित होता है। अन्यथा वाक्य से परपदार्थ (=द्रव्य और एकत्व के सम्बन्ध) का विधान होवे। श्रुत्यर्थ के असम्भव होने पर वाक्य प्रवृत्त होता है, श्रुति के सम्भव होने पर प्रवृत्त नहीं होता है। इसलिये विशेषणरूप से अविधीयमान एकत्व, द्वितीय आदि का प्रतिषेध करने योग्य नहीं है। और इस

दीन् प्रतिषेद्धुमर्हति। एवं सति न द्वितीयादौ सम्मार्गादि क्रियमाणमचोदितं भवति, प्रतिषिद्धं वा। यथैव हि तदेकस्य श्रुतमवगम्यते, तथा द्वितीयादेरपि।

अयं चापरो दोषः– न तदेकत्वं द्रव्यस्य सम्मार्गादौ विषये नियम्येत। न हि सम्मार्गादिर्यस्मिन् द्रव्ये एकत्वं नियम्येत, तस्य विशेषणत्वेन भवति। विधीयते ह्यत्र सम्मार्गादिः। न प्राप्तो लक्षणत्वेन द्रव्यस्याम्नायते। नहि यौगपद्येन विधातुं शक्यते, लक्षणत्वेन चोच्चारयितुम्। प्रसिद्धसम्बन्धो हि शक्नोति लक्षयितुम्। न चाविहित एवञ्जातीयकः शब्दावगम्यः प्रसिद्धसम्बन्धो भवति। विधीयते च सम्मार्गादिः। तस्मान्न विशेषकः। न चेद् विशेषकः,न द्रव्ये एकत्वं नियम्यते, इति शक्यमाश्रयितुम्।

अथैकत्वं सम्मार्गे उच्यते। तत्रापि द्वयी गतिः स्यात्—एकत्वं प्रधानं, सम्मार्गो वा। तच्चोभयमप्यनुपपन्नम्। न तावदेकत्वस्य सम्मार्गः शक्यते कर्तुम्। न च द्रव्ये

प्रकार द्वितीय आदि में क्रियमाण संमार्ग आदि अचोदित (=अकथित) नहीं होता है, और ना ही प्रतिषिद्ध होता है। वह(=संमार्ग) जैसे ही एक का श्रुत जाना जाता है, उसी प्रकार द्विती-यादि का भी जाना जाता है।

और यह दूसरा दोष है—वह एकत्व द्रव्य के सम्मार्गादि विषय में नियमित नहीं होगा। तथा सम्मार्ग आदि जिस द्रव्य में नियमित होगा, उसका एकत्व विशेषणरूप से नहीं होता है। यहां सम्मार्ग आदि का विधान किया जाता है। द्रव्य का लक्षणरूप से प्राप्त आम्नान नहीं किया जाता है, अर्थात् कहा जाता है। युगपत् [सम्मार्ग का] विधान, और [उसका] लक्षणरूप से उच्चारण करना अशक्य है [अर्थात् 'ग्रह को उद्देश करके सम्मार्ग का विधान, और जो सम्मार्ग हैं वह एक होवे' इस प्रकार दो रूप से 'सम्मार्ष्टि' का सम्बन्ध नहीं हो सकता है]। जिस का सम्बन्ध प्रसिद्ध होता है, वही लक्षित कर सकता है। और अविहित इस प्रकार का शब्द से जानने योग्य प्रसिद्ध सम्बन्ध नहीं होता है। [यहां] सम्मार्ग आदि का विधान किया जाता है। इसलिये एकत्व [सम्मार्ग का] विशेषक नहीं है [अर्थात् सम्मार्ग को उद्देश्य करके एकत्व का विधान नहीं है]। और यदि [एकत्व] विशेषक नहीं है, तो द्रव्य में एकत्व नियमित नहीं होता है, यह आश्रयण करना शक्य (=युक्त) है।

विवरण—प्रसिद्धसम्बन्धो हि शक्नोति लक्षयितुम्—जैसे धूम्र का अग्नि के साथ अविना-भाव से रहना सम्बन्ध प्रसिद्ध है, तभी उस धूम्र से अग्नि लक्षित होती है—धूम्रं दृष्ट्वा अध्यव-स्यति अस्त्यत्राग्निः।

व्याख्या—और यदि एकत्व सम्मार्ग के विषय में कहते हो [अर्थात् एकं सम्मार्ष्टि ऐसा सम्बन्ध जोड़ते हो]। तो भी दो गति होंगी—एकत्व प्रधान है, अथवा सम्मार्ग। ये दोनों ही उपपन्न नहीं होते हैं। एकत्व का सम्मार्ग नहीं किया जा सकता है। और द्रव्य में किया हुआ

क्रियमाण एकत्वस्योपकरोति केनचित् प्रकारेण। नचैकत्वस्योपकृतेन किञ्चित् प्रयोजनमस्ति। न हि तद्गुणभूतं श्रुतम्। अथैकत्वं सम्मार्गं प्रति गुणभूतमिति, तदपि न। कथम्। अमूर्त्तत्वात्। न हि तत् सम्मार्गं निष्पादयति। यद्यप्यन्यदमूर्त्तं क्रियां निष्पादयति साधनं विशिषत्, तथाप्येतन्न भवितुमर्हति। नह्यत्र ग्रहः सम्मार्गार्थः, सम्मार्गोऽत्र ग्रहाय चोद्यते। स हि प्रयोजनवान्, कल्प्यप्रयोजनः सम्मार्गः। यदि ग्रहः सम्मार्गस्योपकुर्य्यात्, तदुपकारिण उपकरोतीति। सम्मार्गस्योपकारकमेकत्वं भवेत्। न त्वेतदेवम्। तस्मादेकत्वसम्मार्गयोरसम्बन्धः।

ननु प्रधानभूतमपि ग्रहादि सम्मार्गं निष्पादयत्येव। अतस्तत्साधनं तच्च विशि-

---

[सम्मार्ग] एकत्व का किसी प्रकार से उपकारक नहीं होता है। और ना ही [सम्मार्ग से] उपकृत एकत्व से कोई प्रयोजन है। और [वह सम्मार्ग] उस (=एकत्व) का गुणरूप भी श्रुत नहीं है। और यदि कहो कि एकत्व सम्मार्ग के प्रति गुणभूत है, तो यह भी नहीं है। कैसे? अमूर्त होने से। वह (=एकत्व) सम्मार्ग को निष्पन्न भी नहीं करता है। यद्यपि अन्य (=अरुण गुण) साधन को विशेषित करता हुआ क्रिया को सिद्ध करता है, तथापि यह (=एकत्व) उस प्रकार का नहीं हो सकता। यहां (=ग्रहं सम्मार्ष्टि में) ग्रह सम्मार्ग के लिये नहीं है, सम्मार्ग यहां ग्रह के लिये कहा जाता है। वह (=ग्रह) प्रयोजनवान् है, [सम्मार्ग के लिये ग्रह होवे तो] सम्मार्ग कल्प्य प्रयोजनवाला होता है [अर्थात् सम्मार्ग का प्रयोजन कल्पित करना होगा]। यदि ग्रह सम्मार्ग का उपकारक होवे, तो [एकत्व] उस उपकारी का उपकारक होता है। इस प्रकार एकत्व सम्मार्ग का उपकारक हो सकता है। यह इस प्रकार (=सम्मार्ग के लिये ग्रह) नहीं है। इस कारण एकत्व और सम्मार्ग का सम्बन्ध नहीं है।

विवरण—यद्यप्यन्यदमूर्तं क्रियां निष्पादयति—इसका संकेत पूर्व अधिकरणस्थ अरुणया एकहायन्या सोमं क्रीणाति उदाहरण की ओर है। यहां सिद्धान्तपक्ष में अरुणिमा अमूर्त गुण एकहायनी को विशेषित करता हुआ, क्रय का उपकारक होता है। नहि अत्र ग्रहः सम्मार्गार्थः—एकहायनी द्रव्य जैसे क्रय के लिये है, उस प्रकार यहां ग्रह सम्मार्ग के लिये नहीं है। स हि प्रयोजनवान्—वह सम्मार्ग संस्कार से संस्कृत ग्रह सोमरस के ग्रहण करने और उससे आहुति देने के लिये होने से प्रयोजनवान् है। और ग्रह यदि सम्मार्ग के लिये होवे, तो सम्मार्ग का कोई प्रयोजन न होने से प्रयोजन की कल्पना करनी पड़ेगी। यदिग्रहः सम्मार्गस्योपकुर्यात्—यदि एकहायनी जैसी क्रयार्थ है, तद्वत् ग्रह सम्मार्ग का उपकारक होवे, तो जैसे एकहायनी द्रव्य को विशेषित करता हुआ, अरुण गुण क्रय का उपकारक होता है, तद्वत् एकत्व ग्रह को विशेषित करता हुआ, सम्मार्ग का विशेषक हो सकता है। न त्वेतदेवम्—परन्तु एकहायनी जैसे क्रय के लिये है, वैसे यहां ग्रह सम्मार्ग के लिये नहीं है।

व्याख्या—(आक्षेप) प्रधानभूत ग्रह भी सम्मार्ग का निष्पादन करता ही है [अर्थात् ग्रह न होवे, तो सम्मार्ग किसका होवे]। इसलिये उस (=सम्मार्ग) के साधन उस (=ग्रह) को विशेषित

षत् तदुपकरिष्यति। यथा इज्यार्थे दधनि पयसि च प्रणीता धर्म्माः पाके उपकुर्वन्ति[1]। परिधानार्थे च परिधौ यूपधर्म्मा बन्धने[2]। तस्मादयम् असमाधिरिति। अत्रोच्यते—न ब्रूमः,अतदर्थं साधके न शक्नुवन्त्युपकर्तुमिति। किं तर्हि? यदा प्रधानभूतं ग्रहादि लक्षणत्वेनोच्यते, न तदैकत्वस्य ग्रहादिना सम्बन्धः, न सम्मार्गादिनेति। कथम? यावदिह लक्षणत्वेन किञ्चिदुच्यते, 'संवादस्तत्र[3] भवति। न तु तद्विधीयते विज्ञानाय। किमर्थं तर्ह्युच्चार्य्यते? अन्यत्तस्य किञ्चिद् विधायिष्यते इति। तदेतद् ग्रहादि लक्षयित्वा तस्य सम्मार्गादि विधीयते। तद् यद्येकत्वसम्बन्धोऽपरो ग्रहद्रव्ये सम्मार्गादौ वा पदार्थे विधीयेत, द्वयोः सम्बन्धयोर्विधानाद् भिद्येत वाक्यम्। अथोच्यते, ग्रहादि लक्षयित्वा तस्यैकत्वसम्बन्धो विधीयते, न सम्मार्गादिसम्बन्ध इति। तथाच सम्मार्गादीनामध्ययनं प्रमाद इत्यभ्युपगतं स्यात्। नचैतदेवम्। तस्मादुभाभ्यामेकवचनस्यासम्बन्ध इति। एवमेत-

---

करता हुआ उस (=संमार्ग) का उपकारक होगा। जैसे इज्या (=याग) के लिये दही और पयः में प्रणीता के [उत्पावन आदि] धर्म पाक में उपकारक होते हैं। और परिधान-कार्यवाली-परिधि में [पशुबन्धन] यूपधर्म होते हैं। इसलिये यह समाधान ठीक नहीं है। (समाधान) इस विषय में कहते हैं—हम यह नहीं कहते हैं कि जो जिसके लिये साधक नहीं है [उसमें किये गये कर्म] उसके उपकारक नहीं होते हैं। तो क्या कहते हैं? जब प्रधानभूत ग्रह आदि लक्षणरूप (=उद्देश्यरूप) से कहा जाता है, उस समय एकत्व का ग्रहादि के साथ संबन्ध नहीं होता है, और नाही संमार्ग आदि के साथ। कैसे? जितना भी यहां लक्षण (=उद्देश) रूप से कुछ कहा जाता है, वहां संवाद (=प्रमाणान्तर से वह ज्ञात) होता है। उसका ज्ञान कराने के लिये विधान नहीं किया जाता है। तो उस [ज्ञात] का उच्चारण किस लिये किया जाता है? उसका कुछ अन्य विधान करेंगे, कि इसलिये उच्चारण करते हैं। यहां ग्रह आदि को लक्षित करके उसका सम्मार्ग आदि विधान किया जाता है। अतः यदि अन्य एकत्वसंबन्ध ग्रह आदि द्रव्य में वा सम्मार्ग आदि पदार्थ में विधान किया जावे, तो दो सम्बन्धों के विधान से वाक्यभेद होवे। यदि यह कहते हो कि ग्रह आदि को लक्षित करके उसके एकत्व सम्बन्ध का विधान करते हैं, सम्मार्ग आदि सम्बन्ध का विधान नहीं करते। उस अवस्था में संमार्ग आदि का अध्ययन (=पाठ) प्रमाद स्वीकार करना पड़ेगा। यह ऐसा (=प्रमादपाठ) नहीं है। इसलिये दोनों (=ग्रह और सम्मार्ग) के

---

१. इदमभ्युदयेष्टौ द्रष्टव्यम्। अस्या विधानं तै० सं० २।५।५ इत्यत्र द्रष्टव्यम्। अत्र मी० ६।५। अधि० १ अपि द्रष्टव्यम्।

२. ससोमके चातुर्मास्ये श्रूयते—सोमान् वक्ष्यामः पर्वणां स्थाने, अयूपानेके, परिधौ पशुं नियुञ्जन्ति। आश्व० श्रौत ६।२।२-४॥ अत्रस्था नारायणवृत्तिरपि द्रष्टव्या।

३. मानान्तरेण प्राप्तं भवति, ज्ञातमित्यर्थः।

देकत्वं ग्रहस्य न किञ्चिदुपकारं करोति,न सम्मार्गस्य। एवमेव सदनूद्यते। तस्मान्नैतत् किञ्चिदपि कर्तुं विवक्ष्यते इति। सर्वेषां ग्रहादीनां सम्मार्गादि कर्त्तव्यमिति। कुतः? संयोगतोऽविशेषात् प्रकरणाविशेषाच्च।

यद्यविवक्षितमेकत्वम्, कथं तर्ह्येकवचनमुच्चार्यते? ननु बहुषु विवक्षितेषु बहु-

---

के साथ एकवचन का सम्बन्ध नहीं है। इस प्रकार यह एकत्व ग्रह का कुछ भी उपकार नहीं करता है, और ना ही सम्मार्ग का ही उपकार करता हैं। ऐसे ही (=निष्प्रयोजन ही) विद्यमान का अनुकथन होता है। इसलिये यह (=एकत्व) कुछ भी करने के लिये विवक्षित नहीं हैं। [इस कारण]सब ग्रह आदिकों का सम्मार्ग आदि करना चाहिये। किस हेतु से? [जातिरूप] संयोग के [सब में] समान होने से, और प्रकरण के समान होने से।

विवरण—द्रव्यार्थे दधनि पयसि च प्रणीता धर्माः—यह विधान अभ्युदयेष्टि में है। अभ्युदयेष्टि का विधान तै० सं० २।५।५ में मिलता है। यह अमावास्या में हविनिर्वाप के अनन्तर यदि चन्द्रमा उदय हो जाता है, तो उसके प्रायश्चित्तरूप में विहित है। दर्श के सान्नाय्य पक्ष में दही और दूधरूप यज्ञ के लिये जो हव्य पदार्थ हैं, उनमें प्रणीता के उत्पवन धर्म कहे हैं। प्रणीता अश्वत्थ काष्ठ से निर्मित पात्रविशेष है। इससे जल का नयन किया जाता है। प्रणीता पात्रस्थ जल भी तात्स्थ्य उपाधि से प्रणीता कहा जाता है। उस जल का दक्षिण और उत्तर हाथ में,परस्पर न मिले हुए, धारण किये दो पवित्र (=कुशा के तृण) से जल के मध्यभाग का उछालना वा हिलाना उत्पवन कहाता है। यह उत्पवन धर्म प्रत्येक द्रव द्रव्य में विहित है (द्र०—श्रौतपदार्थ-निर्वचन, पृष्ठ १४, संख्या ११०)। अतः यह दही और पयः में भी संस्कारार्थ प्रयुक्त होता है। पाके उपकुर्वन्ति—अभ्युदयेष्टि में दही और दूध में चरु के पाक का विधान है। अतः उत्पवन धर्म यज्ञीय दही दूध के माध्यम से चरु के पाक में उपकारक होते हैं, यह तात्पर्य है। परिधानार्थे च परिधौ यूपधर्माः बन्धने—आहवनीय अग्नि के कुण्ड की प्रथम मेखला पर दक्षिण पश्चिम उत्तर दिशा में स्थापन करने के लिये पलाश के बाहुमात्र ३ इध्म (=काष्ठ) होते हैं। इनसे आहवनीय का परिधान करने से इन्हें परिधि कहते हैं। चातुर्मास्य के ससोम पक्ष में लिखा है—परिधौ पशुं नियुञ्जन्ति (आश्व० श्रौत ६।२।४) से परिधि में पशुबन्धनरूप यूप का धर्म कहा है। यह यूप-धर्म बन्धन में परिधि के माध्यम से उपकारक होता है। परिधि में यूप के अन्य धर्म नहीं होते हैं। दक्षिण वा उत्तर परिधि में पशु को बांधते हैं। परिधि में बन्धनमात्र से पशु का अपगमन (भाग जाने) का प्रतीकार नहीं होता है। इसलिये परिधि के समीप खूंटा आदि गाड़कर पशु को रोक रखने का उपाय किया जाता है (द्र०—आश्व० श्रौत ६।२।४, नारायणवृत्ति)। प्रधानं ग्रहादि लक्षणत्वेनोच्यते—ग्रहं सम्मार्ष्टि का अर्थ होता है—ग्रहमुद्दिश्य सम्मार्गो विधीयते (=ग्रह को उद्देश करके सम्मार्ग का विधान किया जाता है)। संवादः=सम्यक् वादः=कथन अर्थात् प्रमाणान्तर से ज्ञात होता है।

व्याख्या—(आक्षेप) यदि एकत्व अविवक्षित है, तो एकवचन का क्यों उच्चारण किया

वचनेन भवितव्यम् । उच्यते—न वयमेतद्विचारयामः—एकवचनमुच्चारयितव्यम, नोच्चारयितव्यमिति । उच्चार्यमाणे सति किं प्रतिपत्तव्यम्—एकस्मिन्नेव सम्मार्गादि उत सर्वेष्विति ? तच्च सर्वेष्विति स्थापितम् । अपि च, न विभक्तेर्वचनमेवैकं प्रयोजनम् । किं तर्हि ? कारकसम्बन्धोऽपि । अविवक्षिते एकत्वे कारकसंम्बन्धार्थमस्योच्चारणं भविष्यति । तस्मान्नानर्थकम् ।

अपि च, 'ग्रहः' प्रातिपदिकार्थः, एकत्वं विभक्त्यर्थः । किमतो यद्येवम् ? एतदतो भवति—प्रातिपदिकार्थगतं हि विभक्तिः स्वमर्थं श्रुत्यैव वदति । अथैवं सति किम् ? न सम्मार्गेण सम्भन्त्स्यते इति । तेन हि सम्बध्यमानं वाक्येन सम्बद्धयेत । न च श्रुत्याऽन्येन सम्बध्यमानं वाक्येनाच्छिद्यान्येन सम्बन्धमर्हति । असम्बध्यमानस्त्वेकत्वेन सम्मार्गो यदि नैकत्वविशिष्टः क्रियते, न किञ्चिद् विपन्नं भवति । नचैकविशिष्टः सम्मार्गादिः, ग्रहादिमात्रस्य च विधीयते इति, किमिति द्वितीयस्य तृतीयस्य च न क्रियेतेति ? ।। १४ ।।

चोदिते तु परार्थत्वाद् यथाश्रुति प्रतीयेत ।।१५।। (उ०)

जाता है ? बहुत ग्रहों के विवक्षित होने पर बहुवचन होना चाहिये । (समाधान) हम यह विचार नहीं करते कि—एकवचन उच्चारण करना चाहिये, वा नहीं उच्चारण करना चाहिये । [एक वचन के]उच्चार्यमाण होने पर क्या जानना चाहिये—एक में ही सम्मार्गादि होवें अथवा सब में ? वह [सम्मार्ग आदि] सब [ग्रह आदि] में स्थापित कर दिया है । और भी, विभक्ति का वचन [को कहना] ही एक प्रयोजन नहीं है । तो क्या है ? कारक का सम्बन्ध बताना भी प्रयोजन है । एकत्व के अविवक्षित होने पर भी कारक के सम्बन्ध के लिये इसका उच्चारण होगा । इसलिये अनर्थक नहीं है ।

और भी,'ग्रह' यह प्रातिपदिक का अर्थ है,और एकत्व विभक्ति का अर्थ है । यदि ऐसा है, तो इस से क्या?इससे यह होता है कि—प्रातिपदिक के अर्थ में विद्यमान[एकत्व]को विभक्ति[जो उसका अर्थ एकत्व है उस]स्व अर्थ को श्रुति(=उच्चारण)से ही कहती है । ऐसा होने पर[प्रातिपदिकार्थगत एकत्व को कहने पर]क्या होगा ? सम्मार्ग से सम्बद्ध नहीं होगा ? उस [=सम्मार्ग] से सम्बद्ध हुआ ही वाक्य से सम्बद्ध होगा । और श्रुति से अन्य(=प्रातिपदिक) से सम्बद्ध्यमान [एकत्व] वाक्य से [उसे] अलग करके वह अन्य (=सम्मार्ग) से सम्बद्ध नहीं हो सकता है । एकत्व से असंबद्ध सम्मार्ग यदि एकत्वविशिष्ट नहीं किया जाता है, तो कोई विपन्न (=दोष) नहीं होता है । और यदि सम्मार्ग आदि एकत्व से विशिष्ट नहीं हैं,और ग्रह आदि मात्र का विधान किया जाता है, तो द्वितीय और तृतीय का भी[सम्मार्ग आदि] क्यों न करें ? ।।१४।।

चोदिते तु परार्थत्वाद् यथाश्रुति प्रतीयेत ।।१५।।

सूत्रार्थः—(चोदिते) [पशुमालभेत इस] विहित कर्म में (तु) तो (परार्थत्वात्) पशु के

अथ यदुक्तम्—यथा पशुमालभेत इत्येक एव पशुः पुंपशुश्चालभ्यते, एवमिदमपीति । असत्यत्र वैपरीत्यम् । इह ग्रहार्थः सम्मार्गः । तत्र पुनर्यागार्थः पशुः । किमेवं सति भवति ? यो यागार्थं परिच्छिनत्ति,स यागस्योपकरोति । अपरिच्छिन्नेन न शक्यो यागः कर्तुमिति । न तु ग्रहेण केनचिद्विशिष्टेन सम्मार्गः कर्त्तव्यः, यद् ग्रहं विशिंषत् सम्मार्गस्योपकुर्य्यात् । पशोश्चैतदेकत्वं यागं प्रत्युपदिश्यते । ननूक्तम्—प्रातिपदिकार्थगतं स्वमर्थं विभक्तिः श्रुत्यैवाभिवदतीति । यागे एतद् वाक्येन विधास्यति । तत्र वाक्याच्छ्रुतिर्बलीयसीत्युक्तम् । सत्यम्, यत्र श्रौतोऽभिसम्बन्धो विवक्ष्यते । अविवक्ष्यमाणे च वाक्यावगतः सन्नपर्य्युदसितव्यो भवति । तस्मादेकः पुंपशुश्चालभ्यते इति । ग्रहैकत्वं न

परार्थ=यागार्थ होने से (यथाश्रुति) श्रुति के अनुसार एकत्व और पुंस्त्व का ग्रहण (प्रतीयेत) जाने ।

विशेष—सूत्र १३ में पूर्वपक्षी ने पशुमालभेत उदाहरण देकर कहा था कि जैसे यहां एकत्व और पुंस्त्व विवक्षित है,उसी प्रकार ग्रहं सम्मार्ष्टि में भी एकत्व विवक्षित होना चाहिये। और यदि समाधान-पक्ष से ग्रहं सम्मार्ष्टि में एकत्व अविवक्षित है, तो उसी के अनुसार पशुमालभेत में भी एकत्व और पुंस्त्व अविवक्षित प्राप्त होता है। इन दोनों का समाधान इस सूत्र से किया है।

व्याख्या—और जो यह कहा है कि—जैसे पशुमालभेत [विधान में]एक ही पशु और नर पशु का आलभन किया जाता है, उसी प्रकार यहां (=ग्रहं सम्मार्ष्टि आदि में) भी है। यहां (=पशुमालभेत में) वैपरीत्य है। यहां (=ग्रहं सम्मार्ष्टि में) ग्रह के लिये सम्मार्ग है। और वहां (=पशुमालभेत में) याग के लिये पशु है। ऐसा होने से क्या होता है ? जो [एकत्व और पुंस्त्व] याग के लिये [पशु को] विशेषित करता है, वह याग का उपकार करता है। विना विशेषित [पशु] से याग नहीं किया जा सकता है[अर्थात् जब तक यह ज्ञात न होवे कि किस प्रकार के पशु से याग करना है, तब तक याग नहीं किया जा सकता है]। [ग्रहं सम्मार्ष्टि में] तो किसी [एकत्वादि] से विशिष्ट से सम्मार्ग कर्त्तव्य नहीं है, जो ग्रह को विशेषित करता हुआ सम्मार्ग का उपकार करे। और पशु का यह एकत्व याग के प्रति उपदिष्ट है। (आक्षेप) अभी तो कहा था—प्रातिपदिकार्थगत अपने [एकत्व] अर्थ को विभक्ति श्रुति से ही कहती हैं। याग में यह (=पशु का एकत्व) वाक्य से विधान करेगा। वहां(=श्रुति और वाक्य में) श्रुति बलवती होती है, ऐसा कहा है। (समाधान) सत्य है, जहां श्रौत(=श्रुति-बोधित) सम्बन्ध विवक्षित होता है [वहां श्रुति बलवती होती है]। [श्रुति-सम्बन्ध के]अविवक्षित होने पर वाक्य से जाना गया होता हुआ [वाक्यावगत सम्बन्ध] छोड़ने योग्य होता है। इसलिये [पशुमालभेत में] एक और नर पशु का आलभन किया जाता है। ग्रह का एकत्व

सम्मार्गस्योपकरोतीति । न ग्रहं शक्नोति विशेष्टुम् । तस्मादविवक्षितमिति ॥१५॥ इति सर्वेषां ग्रहादीनां सम्मार्गाद्यधिकरणम् ॥७॥ ग्रहैकत्वन्यायः ॥

[चमसादौ सम्मार्गाद्यप्रयोगाऽधिकरणम् ॥८॥]

संस्काराद्वा गुणानामव्यवस्था स्यात् ॥१६॥ (पू०)

अस्ति ज्योतिष्टोमः । तत्र श्रूयते—दशापवित्रेण ग्रहं सम्मार्ष्टि[1], इति । तत्रैषोऽर्थो-

---

सम्मार्ग का उपकारक नहीं होता है । इसलिये [वह एकत्व] ग्रह को विशेषित नहीं कर सकता है । इसलिये [ग्रह-गत एकत्व] अविवक्षित है ॥१५॥

विवरण—इस अधिकरण का सार यह है कि जिस को उद्देश्य करके कर्म का विधान होता है, वहां संख्या विवक्षित नहीं होती है । अर्थात् उद्देश्यगत संख्या अविवक्षित होती है । और जहां याग को उद्देश्य करके द्रव्य का विधान होता है, वहां द्रव्यविधान के मुख्य होने से तद्गत संख्या और लिङ्ग विवक्षित होते हैं । इसके साथ ही यहां यह भी ध्यान में रखना चाहिये कि पशुमालभेत में आलभेत क्रिया आलभन (=स्पर्श अथवा संज्ञपन) में ही परिसमाप्त नहीं होती है । इसका यागपर्यन्त अनुधावन होता है, अर्थात् आलभेत क्रिया का पर्यवसान यजेत में होता है । इस यजन क्रिया का पशु करण है । इसी प्रकार अञ्जलिना सक्तून् प्रादाव्ये जुहुयात (तै० सं० ३।३।८) में भी होम के लिये सत्तू के होने से सक्तुभिर्जुहोति ऐसा ही अर्थ विवक्षित होता है । अथवा जुहोति का प्रक्षेप अर्थ जानना चाहिये । इस पक्ष में कर्म में द्वितीया होती है । विशेष द्रष्टव्य महाभाष्य २।३।२ सूत्र ॥१५॥

संस्काराद्वा गुणानामव्यवस्था स्यात् ॥१६॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्वस्थित पक्ष की निवृत्ति के लिये है । अर्थात् ग्रहं सम्मार्ष्टि में एकत्व ही अविवक्षित नहीं है, ग्रह भी अविवक्षित है । (गुणानाम्) सम्मार्जन आदि गुणों के (संस्कारत्वात्) संस्कार कर्म होने से (अव्यवस्था) व्यवस्था नहीं (स्यात्) होवे । इस कारण ग्रहसदृश सोमसंबद्ध चमससंज्ञक पात्रों का भी सम्मार्जन होवे ।

व्याख्या—ज्योतिष्टोम का विधान है । वहां सुना जाता है—दशापवित्रेण ग्रहं सम्मार्ष्टि (=सोमरस छाननेवाले वस्त्र के छोर से ग्रह को पोंछता है) । वहां यह अर्थ

---

१. अनुपलब्धमूलम । दशापवित्रेण परिमृज्य परिमृज्य ग्रहासादनम् । कात्या०श्रौत९।५।२३।

ऽधिगतः—सर्वे ग्रहाः सम्मार्जितव्या इति। इदमिदानीं संदिह्यते—किं चमसा अपि सम्मार्ष्टव्या, उत नेति? किं तावत् प्राप्तम्? चमसाद्यपि सर्वं सम्मार्ज्यमिति। कुतः? संयोगतोऽविशेषात्, प्रकरणाविशेषाच्चेति[1]। यथैव हि ग्रहाणामपूर्वसम्बन्धः, एवं चमसानामपि। यथैव च ग्रहा अस्मिन् प्रकरणे, एवं चमसा अपि। तस्मात् सर्वत्र सम्मार्गः।

ननु ग्रहाः श्रूयन्ते, ते चमसानां निवर्त्तका भविष्यन्ति। उच्यते—प्रदर्शनार्थं ग्रहग्रहणं भविष्यति—ग्रहादि सोमपात्रम्। यस्मिन् गृह्यमाणः सोमो व्यवसिच्येतेत्येवमाशङ्क्यते। तत् सर्वं सम्मार्जितव्यम्। यथा 'भोजनकालो वर्त्तते, स्थालानि सम्मृज्यन्ताम्' इत्युक्ते यानि यानि भोजने उपयोगमर्हन्ति, तानि तानि सर्वाणि सम्मृज्यन्ते। स्थालग्रहणं लक्षणार्थमिति गम्यते। एवमिहापि द्रष्टव्यमिति। उच्यते—लोकेऽर्थलक्षणः संव्यवहारः। येन येनार्थः सम्मृष्टेन, उक्तोऽनुक्तो वा, स सम्मृज्येतैव। इह तु वेदे शब्द-

---

जाना गया है कि सब ग्रहों का सम्मार्ग करना चाहिये। अब सन्देह यह होता है कि—चमसों का भी सम्मार्ग करना चाहिये, अथवा नहीं करना चाहिये? तो क्या प्राप्त होता है? चमस आदि सब पात्रों (=जिस-जिस में भी ग्रह के समान सोमरस का ग्रहण होता है) का भी सम्मार्ग करना चाहिये। किस हेतु से? संयोग के समान होने से और प्रकरण के समान होने से (द्र०—सूत्र ३।१।१४ का भाष्य, पृष्ठ ६७६)। जैसे ग्रहों का अपूर्व के साथ संबन्ध है, उसी प्रकार चमसों का भी है। और जैसे ग्रह इस प्रकरण में श्रुत हैं, उसी प्रकार चमस भी श्रुत हैं। इसलिये सर्वत्र सम्मार्ग करना चाहिये।

विवरण—चमसा अपि—चमससंज्ञक चतुष्कोण मध्य में खुदा हुआ पात्र होता है। इसमें भी सोमरस का ग्रहण किया जाता है, और इस से आहुतियां दी जाती हैं। संयोगतोऽविशेषात्—जैसे ग्रहपात्र सोम के ग्रहण और उनसे आहुति देने से अपूर्व=अदृष्ट से सम्बद्ध हैं, वैसे ही चमस भी हैं।

(आक्षेप) [ग्रहं सम्मार्ष्टि में] ग्रह श्रुत हैं, वे चमसों के निवर्तक हो जायेंगे। (समाधान) प्रदर्शन के लिये ग्रह का ग्रहण होगा—ग्रहादि सोमपात्र। जिस में गृह्यमाण (=ग्रहण किया जा रहा) सोम सिंचित (=भरा) जाता है, ऐसी आशङ्का होती है। वह सब पात्र सम्मार्जन करने चाहियें। जैसे—'भोजन का काल है, थालों को साफ करो' ऐसा कहने पर जो-जो पात्र भोजन में उपयुक्त होते हैं, वे-वे साफ किये जाते हैं। थाल का ग्रहण उपलक्षण के लिये है। इसी प्रकरण यहां भी जानना चाहिये। (आक्षेप) लोक में प्रयोजनवश उपलक्षणरूप व्यवहार होता है [अर्थात् प्रयोजनवश उपलक्षणता जानी जाती है]। जिस-जिस के सम्मार्जन से प्रयोजन होता है, चाहे वह उक्त है चाहे अनुक्त, वह सब साफ किया जाता है। यहां वेद

---

१. द्र०—मीमांसाभाष्य ३।१।१४॥ पृष्ठ ६७६ ॥

लक्षणः । शब्दश्च ग्रहस्य सम्मार्गमाह । तत्र किमर्थं श्रुतौ सम्भवन्त्यां ग्रहशब्दो लक्षणया कल्प्यते ? उच्यते—सम्मार्ष्टीति सम्मार्गे पुरुषप्रयत्नं विधातुमेष शब्दः शक्नोति श्रवणेनैव । ग्रहसम्बन्धे तु वाक्येन । श्रुतिश्च वाक्यात् बलीयसी । तस्माल्लक्षणया ग्रहशब्दो वर्ण्यते, न यथाश्रुत इति । तेन यो यः सम्मार्जनसंस्कारार्हः, स स सम्मार्जितव्यः । न ग्रहेष्वेव व्यवतिष्ठेत एवञ्जातीयको गुण इति ॥१६॥

व्यवस्था वाऽर्थस्य श्रुतिसंयोगात् तस्य शब्दप्रमाणत्वात् ॥१७॥ (उ०)

व्यवतिष्ठेत वा ग्रहेष्वेव सम्मार्गो, न चमसेष्वपि प्रसज्ज्येतेति । कुतः ? अर्थस्य

में तो शब्द-लक्षण (=शब्द से लक्षित होनेवाला) व्यवहार है । शब्द केवल ग्रह का सम्मार्ग कहता है । तो वहाँ श्रुति (=श्रुत्यर्थ) के सम्भव होने पर ग्रह शब्द लक्षणा से क्यों कल्पित किया जाये (=उपलक्षणार्थ क्यों माना जाये) ? (समाधान) सम्मार्ष्टि यह शब्द सम्मार्ग में पुरुष के प्रयत्न को विधान करने के लिये श्रवणमात्र से ही समर्थ होता है (=श्रवणमात्र से ही विधान कर सकता है)। ग्रह के सम्बन्ध में तो वाक्य से समर्थ होता है। और श्रुति वाक्य से बलवती होती है। इसलिये लक्षणा से ग्रह शब्द कहा जाता है, यथाश्रुत (=ग्रहमात्र) नहीं कहा जाता है । इसलिये जो-जो सम्मार्जन-संस्कार के योग्य हैं, उस-उस का सम्मार्जन करना चाहिये । केवल ग्रहों में ही इस प्रकार का [सम्मार्जनरूप] गुण स्थिर नहीं होगा ॥१६॥

विवरण—स्थालानि संमृज्यन्ताम्—सुवर्ण रजत आदि का भोजन खाने का बड़ा पात्र, जिस में शाक दाल की कई कटोरियां रखी जा सकें । भाषा में इसी का 'थाल' रूप प्रयुक्त होता है । आकार-सादृश्य से पीतल के बने बड़े पात्र को भी लोक में 'थाल' कहते हैं । थाल का ही ह्रस्व अर्थ में स्त्रीलिङ्ग थाली शब्द लोक में प्रयुक्त होता है । भाषा के थाली शब्द का संस्कृत के स्थाली शब्द के साथ संबन्ध नहीं है । संस्कृत 'स्थाली' शब्द दाल भात पकाने की बटलोई देगची वा पतीली आदि के लिये व्यवहृत होता है । लक्षणार्थ—लक्षित करने के लिये=उपलक्षणार्थ ॥१६॥

व्यवस्था वाऽर्थस्य श्रुतिसंयोगात् तस्य शब्दप्रमाणत्वात् ॥१७॥

सूत्रार्थः—(वा) 'वा' शब्द पूर्वपक्ष की निवृत्ति के लिये है, अर्थात् चमसों का भी सम्मार्जन करना चाहिये, यह नहीं है । (अर्थस्य) ग्रहरूप अर्थ का (श्रुतिसंयोगात्) श्रुति के साथ संयोग होने से । और (तस्य शब्दप्रमाणत्वात्) चोदना के विषय में शब्द के प्रमाण होने से (व्यवस्था) ग्रहं सम्मार्ष्टि से सम्मार्ग ग्रहों में ही व्यवस्थित होवे ।

व्याख्या—ग्रहों में ही सम्मार्ग व्यवस्थित होवे, चमसों में भी प्राप्त न होवे । किस हेतु

श्रुतिसंयोगात्। श्रूयमाणो हि ग्रहो नोत्स्रष्टव्यः। उत्सृज्यमाने श्रुतिरेव बाध्यते ग्रहमिति। प्रमत्तगीतं तत्रभवतामित्यवगम्यते। न चैतन्न्याय्यम्। तस्माद् ग्रहशब्देन ग्रहं लक्षयित्वा तस्य सम्मार्गसम्बन्धो विधीयते। न चाविदधत् सम्मार्गं शक्नोति तत्सम्बन्धं विधातुम्। अतो विदधात्येवैष शब्दः सम्मार्गम्। न च श्रुतिर्बाधिष्यते। कुतः? सम्मार्ष्टीति सम्मृजिगतं पुरुषप्रयत्नं श्रुत्या शक्नोति विधातुम्। न तत्र कश्चिद्विशेषः—उत्पाद्यमाने वा सम्मृजौ, परेण वा सम्बध्यमाने इति। तेन न ग्रहसम्बन्धेऽपि श्रुतिर्बाधिता भवति। अतो ग्रहेष्वेव सम्मार्गो व्यवस्थातुमर्हतीति।

नन्वपूर्वसंयोगाविशेषात् प्रकरणाविशेषाच्च चमसेष्वपि प्रसज्ज्यते, न ग्रहेष्वेवास्य विधानम्,इत्युक्तम्। अत्रोच्यते—प्रकरणवद्भिरेकवाक्यतां कृत्वा शक्नोति तत्र विधातुम्, नाऽकृत्वैकवाक्यताम्। सा च प्रकरणाद् अनुमीयते। इयं पुनर्ग्रहशब्देन सह प्रत्यक्षा। तस्मान्न प्रकरणे विधानम्। ग्रहैकत्वसम्बन्धं पुनरनुत्सृज्य[1] स्वार्थं न शक्नोति विधातुम्।

से? अर्थ का श्रुति के साथ संयोग होने से। [ग्रहं सम्मार्ष्टि में] श्रूयमाण ग्रह का त्याग नहीं करना चाहिये। [ग्रह का] त्याग करने पर 'ग्रहम्' यह श्रुति ही बाधित होवे। उस अवस्था में आपके पक्ष में ग्रहम् यह प्रमत्तगीत जाना जायेगा। यह (=ग्रह का प्रमत्तगीतत्व) न्याय्य नहीं है। इसलिये ग्रह शब्द से ग्रह को लक्षित करके उसके सम्मार्ग-सम्बन्ध का विधान किया जाता है। सम्मार्ग का विधान न करते हुए उस (=ग्रह) के सम्बन्ध का विधान नहीं किया जा सकता है। इसलिये यह (=ग्रहं सम्मार्ष्टि) शब्द [ग्रह के] सम्मार्ग का विधान करता ही है। इस प्रकार श्रुति बाधित भी नहीं होवेगी। कैसे? सम्मार्ष्टि शब्द संपूर्वक मृजि (=सम्मार्जन) गत पुरुषप्रयत्न को श्रुति विधान कर सकती है। चाहे संमार्ग के उत्पाद्यमान (=विधीयमान) होने पर, चाहे पर (=ग्रह) के साथ सम्बध्यमान होने पर, उसमें कोई विशेष (=भेद) नहीं है। इसलिये वहां (=ग्रहं सम्मार्ष्टि में) ग्रह-सम्बन्ध के होने पर भी श्रुति बाधित नहीं होती है। इस प्रकार ग्रहों में ही सम्मार्ग व्यवस्थित हो सकता है।

(आक्षेप) अपूर्व के संयोग के और प्रकरण के समान होने से चमसों में भी [सम्मार्ग] प्राप्त होवे, ग्रहों में ही इस (=सम्मार्ग) का विधान नहीं है, ऐसा हमने कहा था। (समाधान) प्रकरणवान् पदार्थों से एकवाक्यता करके [सम्मार्ष्टि] उन (=चमसों) में विधान कर सकता है, एकवाक्यता विना किये चमसों में सम्मार्ग का विधान नहीं कर सकता है। और वह (=एकवाक्यता) प्रकरण से अनुमित (=जानी) जाती है। और यह ग्रह शब्द के साथ प्रत्यक्ष एकवाक्यता है। इसलिये प्रकरण में [सम्मार्ग का] विधान नहीं है। स्वार्थ को विना छोड़े ग्रह के एकत्व-सम्बन्ध का विधान नहीं कर सकता है। इसलिये ग्रहैकत्व-विधान से यहां विषमता है। और

---

१. 'सम्बन्धे पुनरुत्सृज्य' इति पाठान्तरमसंबद्धमिव दृश्यते।

तस्माद्वैषम्यं ग्रहैकत्वविधानेन[1]। यदुक्तम्—'यथा स्थालानि सम्मृज्यन्ताम्, इति लक्षणा, तद्वदिहापीति। परिहृतमेतत्। लोके कर्मार्थं लक्षणम्, शब्दलक्षणं पुनर्वेद इति ॥१७॥ इति चमसादौ सम्मार्गाद्यप्रयोगाऽधिकरणम् ॥८॥

[सप्तदशारत्निताया: पशुधर्मताऽधिकरणम् ॥९॥

वाजपेये श्रूयते—सप्तदशारत्निर्वाजपेयस्य यूपो भवति[2] इति। तत्र सन्देहः—किं सप्तदशारत्निता वाजपेयस्य ऊर्ध्वपात्रे निविशते, उत पशोर्यूपे निविशते इति? किं तावत् प्राप्तम्? ऊर्ध्वपात्रे इति। कुतः? वाजपेयस्य यूपाभावात्। यद् वाजपेयस्यास्ति पात्रं यूपसदृशं तत्र भवितुमर्हति। अस्ति च षोडशिपात्रम्। तच्च खादिरत्वादूर्ध्वत्वाच्च यूपसदृशम्। तत्र निवेशे सति वाजपेयशब्द आञ्जस्येन भवति। इतरथा वाजपेयाङ्ग पशुयागे लक्षणया वाजपेयशब्दो वृत्तः, इति गम्यते। ननु त्वत्पक्षेऽपि यूपशब्दो लक्षणयोर्ध्वपात्रे। उच्यते—सर्वथा वयं लक्षणाशब्दान्न मुच्यामहे। मत्पक्षे तु वाजपेयप्रकरण-

---

जो यह कहा—जैसे 'स्थालों का सम्मार्जन करो' यहाँ लक्षणा है, उसी प्रकार यहां (=ग्रह में) भी [लक्षणा] होवे। इस का परिहार (=समाधान) कर दिया है। लोक में कर्म के लिये अर्थ-लक्षण (=प्रयोजनवश) लक्षणा होती है, वेद में शब्द-लक्षण कर्म होता है ॥१७॥

व्याख्या—वाजपेय में सुना जाता है—सप्तदशारत्निर्वाजपेयस्य यूपो भवति (=वाजपेय याग का यूप १७ अरत्नि परिमाणवाला होता है)। उसमें संदेह है—क्या सप्तदश अरत्निप्रमाणता वाजपेययाग के ऊर्ध्वपात्र (=ऊंचे खड़े ग्रहादि पात्र) में निविष्ट होती है, अथवा [वाजपेययाग में] पशु के यूप में निविष्ट होती है? क्या प्राप्त होता है? [वाजपेययाग के] ऊर्ध्वपात्र में निविष्ट होती है। किस हेतु से? वाजपेय याग का यूप न होने से। इसलिये वाजपेययाग का जो यूपसदृश [ऊर्ध्व] पात्र है, उसमें [सप्तदश अरत्निता] निविष्ट हो सकती है। षोडशिपात्र है। वह (=षोडशिपात्र) खदिर का बना हुआ होने से, और ऊर्ध्व होने से यूपसदृश है। उस (=षोडशिपात्र) में [सप्तदश अरत्निता का] निवेश होने पर वाजपेय शब्द सरलता से (=श्रुति से=विना लक्षण के) उपपन्न होता है। अन्यथा वाजपेय के अङ्ग पशुयाग में लक्षणा से वाजपेय शब्द वर्तता है, ऐसा जाना जाता है। (आक्षेप) तुम्हारे पक्ष में भी यूपशब्द लक्षणा से ऊर्ध्वपात्र में वर्तता है। (समाधान) हम लक्षणा शब्द से सर्वथा मुक्त नहीं होते हैं। मेरे पक्ष में तो [वाजपेयशब्द का मुख्यार्थ स्वीकार

---

१. काशीसंस्करणे वाक्यमेतत् त्रुटितं वर्तते।

२. अनुपलब्धमूलम्। द्र०—सप्तदशारत्निर्वाजपेययूपः। शत० ब्रा० ३।६।४।२६॥

मनुगृह्यते। तस्मादूर्ध्वपात्रे निवेश इति। एवं प्राप्ते ब्रूमः—

आनर्थक्यात् तदङ्गेषु ॥१८॥ (उ०)

वाजपेयशब्दस्तावत् सोमयागविशेषवचनः। तस्य साक्षाद् यूपेन न प्रयोजनम्। अस्ति तु तस्याङ्गं पशुयागः। तस्य तु पशुं बद्धुं यूपेन कार्यम्। साक्षाद् वाजपेययूपस्य

करने पर] वाजपेय का प्रकरण अनगृहीत होता है। इसलिये [सप्तदश अरत्निता का वाजपेय के] ऊर्ध्वपात्र में निवेश होता है। ऐसा प्राप्त होने पर हम कहते हैं—

विवरण—सप्तदशारत्निः=१७अरत्नि परिमाण है जिसका,यहां बहुव्रीहि समास है। अरत्नि का परिमाण प्रसृत कनिष्ठा (=सब से छोटी फैली हुई अंगुलि)होता है। यह २८अङ्गुल के बराबर होता है। आप० श्रौत १।६।१ की धूर्तस्वामी कृत भाष्य की वृत्ति का अधिक पाठ है—**द्विप्रादेश इध्मो वै कीलेः** (द्र०—मैसूर सं० भाग १, पृष्ठ ५१, टि० ४)। अंगुष्ठ और तर्जनी (=अंगूठे के पास की अङ्गुलि) का फैलाव प्रादेश माना जाता है। यह ११ अङ्गुल परिमाण होता है। अतः २ प्रादेश × ११ अंगुल=२२ अङ्गुल अरत्नि परिमाण होता है। अरत्निपरिमाण बद्धमुष्टि हस्त-वाला=२० अंगुल का होता है। **तच्च खादिरत्वात्**—वह षोडशी ग्रह खदिर का होता है(भाष्य-प्रामाण्य से)। यूप भी खदिर का होता है—**खादिरो यूपो भवति** (शत० ब्रा० ३।६।२।१२)। **ऊर्ध्वत्वाच्च**—ग्रहपात्र भी ऊर्ध्व परिमणावाले होते हैं, और यूप भी। किन्हीं के मत में षोडशी ग्रह अन्य ग्रहों से कुछ अधिक ऊंचा होता है। **लक्षणया वाजपेयशब्दः**—वाजपेयबोधित प्रधान याग में यूप न होने से वाजपेय शब्द का लक्षणा से 'वाजपेय का अङ्ग' ऐसा अर्थ करना पड़ेगा। **यूपशब्दो लक्षणयोर्ध्वपात्रे**—इसका भाव यह है कि वाजपेय शब्द में लक्षणा न मानने पर वाजपेय में यूप न होने से यूप शब्द का लक्षणा से यूपसदृश ऊर्ध्वपात्र अर्थ करना पड़ेगा।

आनर्थक्यात् तदङ्गेषु ॥१८॥

सूत्रार्थः—[मुख्य कर्म में किसी विधि के] (आनर्थक्यात्) अनर्थक होने से (तदङ्गेषु) उस कर्म के अङ्गों में उसका विधान जानना चाहिये।

विशेष—सूत्र सामान्य है। इसमें किसी कर्मविशेष का निर्देश नहीं है। व्याख्याकारों ने वाजपेययाग में श्रुत **सप्तदशारत्निर्वाजपेयस्य यूपो भवति** उदाहरण दिया है। तदनुसार वाजपेय जो सोमप्रधान याग है,उसमें सप्तदश अरत्निपरिमाणवाले यूप का विधान अनर्थक होने से उसके अङ्ग-भूत पशुयाग के यूप में सप्तदश अरत्नि परिमाण का निवेश होता है।

व्याख्या—वाजपेय शब्द सोमयागविशेष का वाचक है। उसका साक्षात् यूप से कोई प्रयोजन नहीं है। परन्तु उसका अङ्गभूत पशुयाग है। उस (=अङ्गभूत पशुयाग) का पशु को बांधने के लिये यूप से कार्य है। यदि साक्षात् वाजपेय के यूप की सप्तदश अरत्निता का विधान कहते

यदि सप्तदशारत्निता विधीयते, तस्याभावादनर्थकमेव वचनं प्राप्नोति। तदनर्थकं मा भूदिति, योऽस्य पशुयागे यूपः, तत्र निवेशमर्हति। ऊर्ध्वपात्रे च यूपशब्दो लक्षणया स्यात्। नन्वितरस्मिन्नपि पक्षे वाजपेयशब्दो लक्षणयेति। नेति ब्रूमः। वाजपेये एव वाजपेयशब्दो भविष्यति। शक्ष्यति च स पशुयूपं विशेष्टुम्। सोऽस्याङ्गस्योपकारकः। यश्च यस्योपकारिण उपकरोति, भवति स तस्य[1] सम्बद्धो मुख्येनैव सम्बन्धेन। न चैकान्तरितम्, इति कृत्वाऽसम्बद्धो भवति। यथा देवदत्तस्य नप्ता इति पुत्रेण च असावन्तरितः। अथ च देवदत्तेन मुख्येनैव सम्बन्धेन सम्बद्धः। तस्मादेष एव पक्ष आश्रयणीयः। न हि एतस्मिन् पक्षे कश्चिदपि लक्षणाशब्दो भवतीति ॥१८॥ इति सप्तदशारत्नितायाः पशुधर्मताऽधिकरणम् ॥६॥

हैं, तो [वाजपेय में] उस (=यूप) के अभाव होने से [सप्तदश अरत्निता] वचन की अनर्थकता ही प्राप्त होती है। यह वचन अनर्थक न होवे, इसलिये जो इस (=वाजपेय) का पशुयाग में यूप है, उसमें [सप्तदश अरत्निता का] निवेश होना योग्य है। और ऊर्ध्वपात्र (=ग्रह) में (सप्तदश अरत्निता का निवेश मानने में] यूप शब्द लक्षणा से होगा। (आक्षेप) दूसरे पक्ष में भी वाजपेय शब्द लक्षणा से [तदङ्ग पशुयाग को कहनेवाला] होगा। (समाधान) [वाजपेय शब्द लक्षणा से] नहीं होता है, ऐसा हम कहते हैं। वाजपेययाग में ही वाजपेय शब्द वर्तमान होगा। और वह (=वाजपेय शब्द) पशु के यूप को विशेषित कर सकेगा। वह (=पशुयूप) इस (=वाजपेय) के अङ्ग (=पशुयाग) का उपकारक है। जो जिस (=वाजपेय) के उपकार करनेवाले (=पशुयाग) का उपकारक होता है, वह (=उपकारी का उपकारक) मुख्य सम्बन्ध से ही उससे सम्बद्ध होता है। एक से व्यवहित है, ऐसा मानकर असम्बद्ध नहीं होता है। जैसे देवदत्त का नप्ता (=पौत्र) [यहां देवदत्त का नप्ता] पुत्र से व्यवहित हैं। फिर भी मुख्य सम्बन्ध से ही देवदत्त के साथ सम्बद्ध होता है। इसलिये यही पक्ष आश्रय के योग्य है। इस पक्ष में कोई भी लक्षणा शब्द नहीं होता है ॥१८॥

विवरण—तस्य सम्बद्धो मुख्येनैव—'तस्य' यही सार्वत्रिक पाठ है, परन्तु अर्थ के अनुरोध से 'तेन सम्बद्धो०' पाठ होना चाहिये। यथा आगे देवदत्तेन मुख्यनैव सम्बन्धेन सम्बद्धः वाक्य में देवदत्तेन में तृतीयान्त पाठ है। अथवा—तस्य यहां तृतीया के अर्थ में षष्ठी विभक्ति जाननी चाहिये।

---

१ तस्येति षष्ठ्यः सार्वत्रिकः पाठः। तथाऽप्यत्र 'तेन सम्बद्धः' इत्येवं पाठेन भाव्यम्। यथोत्तरवाक्ये 'देवदत्तेन मुख्येनैव सम्बन्धेन सम्बद्धः' इत्यत्र तृतीयान्तो देवदत्तशब्दः। यद्वा—तृतीयार्थे षष्ठी द्रष्टव्या। यथा 'अश्मकैरागच्छामि' इत्यत्र पञ्चम्यर्थे तृतीया। द्र०—मी० १।३।२६ सूत्रं तद्भाष्यं च।

[अभिक्रमणादीनां प्रयाजमात्राऽङ्गताऽधिकरणम् ॥१०॥]

कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात् ॥१६॥ (पू०)

दर्शपूर्णमासयोः प्रयाजवाक्ये श्रूयते—'अभिक्रामं जुहोत्यभिजित्यै'[1] इति। तत्र सन्देहः—किमभिक्रमणं प्रयाजेष्वेव निविशते, उत कृत्स्ने प्रकरणे इति ? किं तावत् प्राप्तम् ? कर्तृगुणेऽभिक्रमणे ब्रूमः—वाक्यभेदः स्यादिति। कर्मणा कर्मणोऽसमवायात्। अभिक्रमणं कर्म अमूर्त्तम्, न तत्कर्म्म हवनं साधयितुं शक्नोति। तस्मान्न तेनैकवाक्यतां याति। अतः सर्वस्मिन् प्रकरणे निविशते। संयोगतोऽविशेषात् प्रकरणाविशेषाच्चेति। नन्वनेनैव हेतुनाऽन्यस्मिन्नपि न निवेक्ष्यते। उच्यते—अन्यत्र पुरुषैः सम्भन्त्स्यते। ननु प्रयाजेष्वपि

यथा—अश्मकैरागच्छामि में पञ्चम्यर्थ में तृतीया विभक्ति है। इस विषय के लिये मीमांसा १।३। २६ सूत्र, और उसका भाष्य (भाग १, पृष्ठ २६७-२६८) देखना चाहिये ॥१८॥

कर्तृगुणे तु कर्मासमवायाद् वाक्यभेदः स्याद् ॥१६॥

सूत्रार्थः—(कर्तृगुणे) कर्ता के गुण अभिक्रमण में (कर्मासमवायात्) [अभिक्रमण कर्म का] 'जुहोति' कर्म के साथ समवाय=सम्बन्ध न होने से (वाक्यभेदः) वाक्यभेद (स्यात्) होवे। अर्थात् प्रयाजयाग में अभिक्रामं जुहोति (=अभिक्रमण करते हुए आहुति देवे) में उक्त अभिक्रमण का वाक्यभेद होकर सारे दर्शपूर्णमास-प्रकरण में सम्बद्ध होता है।

व्याख्या—दर्शपूर्णमास के प्रयाजयाग-सम्बन्धी वाक्य में सुना जाता है—अभिक्रामं जुहोति अभिजित्यै (=अभिक्रमण=आगे बढ़ते हुए आहुति देवे, सब ओर से जय के लिये)। इसमें सन्देह है - क्या यह अभिक्रमण प्रयाजों में ही निविष्ट होता है, अथवा सम्पूर्ण [दर्शपूर्णमास] प्रकरण में ? क्या प्राप्त होता है ? कर्ता के गुणरूप अभिक्रमण के विषय में कहते हैं—वाक्यभेद होवे। कर्म (=क्रिया) के साथ कर्म (=क्रिया) का समवाय (=संबन्ध) न होने से। अभिक्रमण कर्म अमूर्त है, वह हवनरूप कर्म को सिद्ध नहीं कर सकता है। [इसलिये अभिक्रमण] उस (=होमरूप कर्म) के साथ एकवाक्यता को प्राप्त नहीं होता है। इसलिये सम्पूर्ण [दर्शपूर्णमास] प्रकरण में संबद्ध होता है। संयोग के समान होने से, और प्रकरण के समान होने से। (आक्षेप) इसी (=कर्म कर्म के साथ संबद्ध नहीं होता है) हेतु से अन्य [कर्म] में भी संबद्ध नहीं होगा। (समाधान) अन्यत्र पुरुषों के साथ सम्बद्ध होगा [अर्थात् पुरुष जो भी कर्म करें,

---

१. तै० सं० २।६।१॥

पुरुषैः सम्बद्ध्येत। नैतदेवम्। जुहोतीति हवने एष शब्दः पुरुषप्रयत्नं विदधातुं शक्नोति, न पुरुषाभिक्रमणसम्बन्धम्। नन्वन्यत्रापि पुरुषाभिक्रमणसम्बन्धस्याविधानम्। नैष दोषः। अन्यत्र प्रकरणाम्नानादङ्गभावे निर्ज्ञाते प्रयोगवचनोऽस्य कर्त्तव्यतां वक्ष्यति। तस्मात् सर्वस्मिन् प्रकरणेऽभिक्रमणस्य निवेश इति ॥१९॥

साकाङ्क्षं त्वेकवाक्यं स्याद् असमाप्तं हि पूर्वेण ॥२०॥ (उ०)

नैतदस्ति यदुक्तम्—'अभिक्रमणं प्रकरणे निविशते' इति। प्रयाजेष्वेव भवितुमर्हति। कुतः? तैः सहास्यैकवाक्यता। यतः साकाङ्क्षमेतत्, पूर्वेण पदेनासमाप्तं वाक्यम्। अभिक्राम जुहोति इत्यत्र पर्यवस्यति। प्रकरणाच्च वाक्यं बलवद्, इति प्रयाजेष्वेवाभिक्रमणं निवि-

---

अभिक्रमण करते हुए करें]। (आक्षेप) तब तो प्रयाजों में भी पुरुषों के साथ सम्बद्ध होवे [अर्थात् प्रयाज होम करनेवाले पुरुष आगे बढ़ते हुए होम करें]। (समाधान) ऐसा नहीं हो सकता है। यहां 'जुहोति' यह शब्द हवन में पुरुष-प्रयत्न को कह सकता है, पुरुष के अभिक्रमण सम्बन्ध को नहीं कह सकता। (आक्षेप) अन्यत्र भी पुरुष के अभिक्रमण-सम्बन्ध का विधान नहीं होगा। (समाधान) यह दोष नहीं है। अन्यत्र प्रकरण में पठित होने से [अभिक्रमण के] अङ्गभाव के ज्ञात हो जाने पर प्रयोगवचन इस (=अभिक्रमण) की कर्तव्यता को कहेगा। इसलिये पूरे प्रकरण में अभिक्रमण का निवेश होता है ॥१९॥

विवरण—श्रौतयज्ञों में प्रधान आहुतियों से पूर्व प्रयाजसंज्ञक होम होते हैं, और पश्चात् अनुयाजसंज्ञक। इन प्रयाजों के प्रकरण में लिखा है– अभिक्रामं जुहोत्यभिजित्यै (=जय के लिये आगे बढ़ते हुए आहुति देवे)। इस विषय में हम मी० २।२।२ के भाष्य-विवरण (पृष्ठ ४४७) में विस्तार से लिख चुके हैं ॥१९॥

साकाङ्क्षं त्वेकवाक्यं स्याद् असमाप्तं हि पूर्वेण ॥२०॥

सूत्रार्थः—(तु) 'तु' शब्द पूर्वपक्ष की निवृत्ति के लिये है, अर्थात् अभिक्रमण का पूरे दर्श-पूर्णमास में निवेश होता है, यह ठीक नहीं है, (साकाङ्क्षम्) अभिक्रामं जुहोति के पद परस्पर साकाङ्क्ष हैं, इसलिये (एकवाक्यम्) एकवाक्य (स्यात्) होवे। (पूर्वेण) पूर्व अभिक्रामम् से वाक्य (असमाप्तं हि) निश्चय से असमाप्त है।

व्याख्या—यह नहीं है जो कहा है—'अभिक्रमण [दर्शपूर्णमास]-प्रकरण में सम्बद्ध होता है'। [यह अभिक्रमण] प्रयाजों में ही [संबद्ध] हो सकता है। किस हेतु से? उन प्रयाजयागों के साथ इस (=अभिक्रमण) की एकवाक्यता है। यतः यह साकाङ्क्ष है, पूर्वपद (=अभि-क्रामम्) से वाक्य असमाप्त है। अभिक्रामं जुहोति में (=अभिक्रमण का 'जुहोति' के साथ सम्बन्ध होने पर) वाक्य पूरा होता है। प्रकरण से वाक्य बलवान् होता है, इसलिये प्रयाजों में

शते। नन्वभिक्रमणममूर्तत्वाद्धोमनिर्वृत्तावसमर्थम्, इत्युक्तम्—उच्यते साक्षादसमर्थम्। कर्त्रा सम्बध्यमानं शक्ष्यति निर्वर्त्तयितुम्। कथम्? अभिक्रमणेन समासीदति आहवनीयं कर्त्ता। द्वयमभ्युपायभूतं होमस्य—दूराद्वाऽभिप्रसार्य हस्तं जुहुयात्, समासीदन्[1] वाऽभिक्रमणेन। तस्मादभिक्रमणमुपकरोति होमस्य, इत्यवगम्यते। अतः प्रयाजेष्वेव निवेश इति ॥२०॥ इत्यभिक्रमणादीनां प्रयाजमात्राऽङ्गताऽधिकरणम् ॥१०॥

[उपवीतस्य प्राकरणिकाङ्गताऽधिकरणम् ॥११॥]

दर्शपूर्णमासयोः[2] सप्तमाष्टमयोर्ब्राह्मणानुवाकयोः[3] सामिधेन्य उक्ताः। नवमे निविदः, दशमे काम्याः सामिधेनीकल्पाः। इदंकामस्यैतावतीरनुब्रूयात्, इदंकामस्यैतावतीरिति। एकादशे च यज्ञोपवीतमाम्नातम्—उपव्ययते देवलक्ष्ममेव तत् कुरुते[4] इति। तत्र संदेहः—किं

ही अभिक्रमण निविष्ट होता है। (आक्षेप) अभिक्रमण अमूर्त होने से होम की सिद्धि में असमर्थ है, ऐसा हमने कहा था। (समाधान) [अभिक्रमण होम के साथ सम्बद्ध होने में] साक्षात् असमर्थ है। कर्ता के साथ सम्बद्ध होता हुआ [होम को] सिद्ध करने में समर्थ होगा। कैसे? कर्ता [होम करने के लिये] अभिक्रमण से आहवनीय के पास जाता है। होम के दोनों ही उपाय हैं—दूर से हाथ फैलाकर होम करे, अथवा अभिक्रमण से आहवनीय के समीप होता हुआ होम करे। इस से अभिक्रमण होम का उपकार करता है, यह जाना जाता है। इसलिये [अभिक्रमण का प्रकरण से] प्रयाजयागों में ही निवेश होता है ॥२०॥

व्याख्या—दर्शपूर्णमास की [तै० सं० काण्ड २, प्रपा० ५ के] सप्तम अष्टम ब्राह्मण अनुवाक में सामिधेनियां कही हैं। नवम अनुवाक में निवित् संज्ञक मन्त्र पढ़े हैं, दशम अनुवाक में सामिधेनी के विविध कल्प (=पक्ष) समाम्नात हैं, इस कामनावाले की इतनी सामिधेनियां बोले, इस कामनावाले की इतनी। एकादश अनुवाक में यज्ञोपवीत समाम्नात है—उपव्ययते देवलक्ष्ममेव तत् कुरुते (=उपव्यान=यज्ञोपवीत को वाम कन्धे पर धारण करना, वह देवों

---

१. 'समासीदेद् अन्वाभिक्रमणेन' इति सर्वत्रमुद्रितः पाठोऽप्यर्थाननुगतत्वादपपाठः।

२. दर्शपूर्णमासयोः प्रकरणं तैत्तिरीयसंहिताया द्वितीयकाण्डस्य पञ्चमषष्ठप्रपाठकयोराम्नायते।

३. तैत्तिरीयसंहिताया द्वितीयकाण्डे पञ्चमप्रपाठके इति शेषः।

४. तै० सं० २।५।११॥

सामिधेनीरेवानुब्रुवाणः उपव्ययेत, उत प्रकरणे सर्वानेव पदार्थाननुतिष्ठता उपव्यातव्यमिति ? कुतः संशयः ? किम् उपवीतं सामिधेनीनां प्रकरणे समाम्नातम्, अथ निर्वृत्ते वा तासां प्रकरणे, इति न ज्ञायते ?

ननु दर्शपूर्णमासयोरेव प्रकरणमिदम् । परप्रकरणे सामिधेन्यः श्रूयन्ते । सत्यम्, परप्रकरणे श्रूयन्ते, तथापि तासामवान्तरप्रकरणमपरम् । भवति हि सामिधेनीरनुब्रूयाद्

के चिह्न को करता है) । इसमें सन्देह है—क्या सामिधेनी मन्त्रों को पढ़ता हुआ ही यज्ञोपवीत को वाम कन्धे पर धारण करे, अथवा [दर्शपूर्णमास] प्रकरण में सभी कर्मों का अनुष्ठान करते हुए उपव्यान (=दाहिना हाथ बाहर निकालते हुए यज्ञोपवीत को बायें कन्धे पर धारण) करे ? किस हेतु से संशय है ? क्या उपवीत सामिधेनी के प्रकरण में पढ़ा है, अथवा उन (=सामिधेनियों) के प्रकरण के निवृत्त हो जाने पर, यह नहीं जाना जाता है ?

विवरण—दर्शपूर्णमासयोः—दर्शपूर्णमास कर्म का तै० सं० काण्ड दो के पञ्चम षष्ठ प्रपाठक में कथन है । **सप्तमाष्टमयोर्ब्राह्मणानुवाकयोः**—भाष्यकार का यह संकेत तैत्तिरीय संहिता के द्वितीय काण्ड के पञ्चम प्रपाठक की ओर है । इस निर्देश से जाना जाता है कि आचार्य शबर स्वामी तैत्तिरीय संहिता के अध्येता थे । क्योंकि पूरा निर्देश न करके सांकेतिक निर्देश प्रायः व्याख्याकार अपनी संहिता वा ब्राह्मण के लिये करते हैं । **सामिधेन्यः**—अग्नि को प्रदीप्त करने वाली ऋचाएं सामिधानी कहाती हैं । ये प्रकृतियाग में १५ होती हैं । इनसे प्रतिमन्त्र अग्नि को प्रदीप्त करने के लिये एक-एक समित् आहवनीयाग्नि में छोड़ी जाती हैं । **नवमे निविदः**—सामिधेनी के पाठ के अनन्तर जो प्रवर और स्रुक् ग्रहण के मन्त्र प्रयुक्त होते हैं, उन्हें निवित् कहा जाता है । **उपव्ययते**—उपव्यान का अर्थ है—यज्ञोपवीत को बायें कन्धे पर धारण कर दाहिना हाथ बाहर निकालना । इस प्रकार यज्ञोपवीत को धारण करना देवों का चिह्न माना जाता है । इसलिये समग्र देवकर्म में यज्ञोपवीत को बांये कन्धे पर ही धारण करना चाहिये । मनुस्मृति २।६३ में कहा है—**उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ॥** अर्थात् दक्षिण हाथ को बाहर निकालने (=बायें कन्धे पर जनेऊ धारण करने) पर द्विज उपवीती कहाता है । बायें हाथ को बाहर निकालने पर प्राचीनावीती, और कण्ठ में लटकाने पर निवीती कहाता है । तै० सं० २।५।११ में कहा है—**निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानाम्** । अर्थात् मानुष कर्म में निवीत, पितृकर्म में प्राचीनावीत, और देवकर्म=यज्ञादि में उपवीत धारण करना चाहिये । इस से स्पष्ट है कि सम्प्रति देवकर्म को छोड़ कर सर्वकाल में जनेऊ का उपवीत धारण करना शास्त्रविरुद्ध है ।

व्याख्या—(आक्षेप) यह दर्शपूर्णमास का ही प्रकरण है । सामिधेनियां पर (=दर्शपूर्णमास) के प्रकरण में सुनी जाती हैं । [इस कारण उपवीत का सम्बन्ध दर्शपूर्णमास के साथ होगा] । (समाधान) सत्य है, [सामिधेनियां] पर के प्रकरण में सुनी जाती हैं, फिर भी उन (=सामिधेनियों) का अवान्तर दूसरा प्रकरण है । सामिधेनीरनुब्रूयात् (=सामिधेनियों

इति विशेषाङ्क्षं वचनम्। येन तत्सन्निधावभिधीयमानं तस्येति ज्ञायते। कथं पुनर्निवृत्तं तासां प्रकरणमित्याशङ्क्यते? निवित्पदानि तासां प्रकरणं व्यवदधतीति। यद्येवं, कथमनुवर्त्तते प्रकरणमित्याशङ्का? परस्तान्निविदां सामिधेनीगुणा एव काम्या विधीयमानाः श्रूयन्ते, यदनन्तरं यज्ञोपवीतमाम्नातम्। तेनानिवृत्तं सामिधेनीनां प्रकरणमिति भवति मतिः। अतः परप्रकरणे निविदः समुपनिपतिता न व्यवदधति। यथा द्वादशोपसत्ताऽहीनधर्मो[1] ज्योतिष्टोमप्रकरणे इति। तेन भवति सन्देहः।

अस्मिन् सन्दहे किं तावत् प्राप्तम्? सामिधेनीप्रकरणम अनिवृत्तम्। तत्र उप-

---

